देवी । अज्जउत्त ! अलङ्घिदपुव्वो सम्पदं णिअमो । * ( १ )

( इति सपरिजना निष्क्रान्ता )

उर्व्व । हला ! पिअकलत्तो राएसी ; ण उण हिअअं णिअत्ता-दुदुं सक्कणोमि । ( २ ) †

चित्र । कधं त्थिरासो णिअत्तीअदि ? ( ३ )

राजा । ( आसनमुपसृत्य ) वयस्य ! दूरं गता देवी ।

विदू । भण वीसत्थो, जं सि वत्तुकामो ; असज्झो त्ति परि-च्छिदिअ आदुरो विअ वेज्जेण अदूरेण मुक्को तत्थ-भोदीए भवं । ( ४ )

---

(१) आर्य्यपुत्र ! अलङ्घितपुर्व्वः साम्प्रतं नियमः ।

(२) अयि ! प्रियकलत्रो राजर्षिः ; न पुन र्हृदयं निवर्त्तयितुं शक्नोमि ।

(३) कथं स्थिराशं निवर्त्त्यते । स्थिराशं हृदयमिति शेषः ।

(४) भण विश्वस्तो, यदसि वक्तुकामः ; असाध्य इति परिच्छिद्यातुर-इव वैद्येन अचिरेण मुक्तस्तत्रभवत्या भवान् । परिच्छिद्य निश्चित्य । आतुरः उत्कटरोगग्रस्तः ।

---

* नियमो व्रतं साम्प्रतम् अलङ्घितपुर्व्वः अपरित्यक्तपुर्व्वः ; व्रतदिवसे मया संयतया स्थातव्यम्, अन्यथा पुण्यहानिः स्यात् ; अतोऽहमद्य भवत्-समीपे न स्थास्यामीति भावः । क्वचित् 'ण लङ्घिदपुव्वो णिअमो' इति पाठः ।

† हृदयं राजासक्तमिति शेषः, निवर्त्तयितुं राज्ञः सकाशात् प्रत्यानेतुं न शक्नोमि, प्रियकलत्रो हि नान्यां कामयते इति ज्ञात्वापि राजानुगतं मनः स्वायत्तीकर्त्तुं न पारयामीत्यर्थः ।

राजा। अपि नामोर्व्वशी ?।

उर्व्व। (आत्मगतम्) अज्ज कदत्था भवे। (१)

राजा। गूढ़ं नूपुर-शब्दमात्रमपि मे कान्तं श्रुतौ पातयेत्,
पश्चादेत्य शनैः करोत्पलहृते कुर्व्वीत वा लोचने।
हर्म्येऽस्मिन्नवतीर्य्य साध्वसवशान्मन्दायमाना बला-
दानीयेत पदात् पदं चतुरया सख्या ममोपान्तिकम् ?॥*

चित्र। हला उव्वसि! इदं दाव से मणोरहं सम्पादेहि। (२)

उर्व्व। (ससाध्वसम्) कीड़िस्सं दाव। (३)

(इति पृष्ठेनागत्य राज्ञो लोचने संवृणोति। चित्रलेखा विदूषकं संज्ञां लम्भयति)

राजा। (स्पर्शं रूपयित्वा) सखे! न खलु नारायणोरुसम्भवा वरोरुः ?।

विदू। कधं भवं अवगच्छदि ?। (४)

---

(१) अद्य कृतार्था भवेत्, उर्व्वशीति शेषः।
(२) अयि उर्व्वशि! इमं तावदस्य मनोरथं सम्पादय।
(३) क्रीड़िष्यामि तावत्।
(४) कथं भवानवगच्छति ?

---

* गूढ़ं गुप्तं राज्ञः परिज्ञानशङ्कया मन्दमन्दपदसञ्चारेणातिमृदु-मित्यर्थः। कान्तं कमनीयं श्रुतिसुखमित्यर्थः। साध्वसवशात् लज्जा-भयवशात्। मन्दायमाना मन्देवाचरन्ती मत्समीपागमने विलम्बय-न्तीत्यर्थः।

राजा । किमत्र ज्ञेयम् ।

अन्यत् कथमिव पुलकैः कलितं मम गात्रकं करस्पर्शात् ।
नोच्छ्वसिति तपनकिरणैश्चन्द्रस्येवांशुभिः कुमुदम् ॥ *

उर्व्व । अम्महे! वज्जलेव घड़िदं विअ मे हत्थजुअलं ण समत्थाम्हि अवणेदुं (१)

( इति मुकुलिताक्षी चक्षुषोर्हस्तावपनीय समाश्वस्ता तिष्ठति । कथञ्चिदुपसृत्य ) जयदु जअदु महाराओ । (२)

चित्र । सुहं दे वअस्सस्स । (३)

राजा । नन्वेतदुपपन्नम् ।

---

(१) आश्चर्य्यम्, वज्रलेपघटितमिव मे हस्तयुगलं न समर्थास्मि अपनेतुम् ।

(२) जयतु जयतु महाराजः ।

(३) सुखं ते वयस्यस्य ।

---

* अन्यत् कथमिव अन्यत् किं, वक्तव्यमिति शेषः । उर्व्वशी निश्चये प्रमाणमाह पुलकैरिति, करस्पर्शात् उर्व्वश्या इति शेषः, मम गात्रकं पुलकैः कलितं व्याप्तं; पुलकदर्शनेन तस्या एव करस्पर्श इति निश्ची-यते अन्यथा पुलकाभावः स्यादिति भावः । केचित्तु, करस्पर्शात मम गात्रकं पुलकैः कलितं सदन्यदिव अनिर्व्वचनीयावस्थमिव कथं जात-मिति शेष इति व्याचक्षते । एतन्मते अन्यथापद मूहनीयम् । "कथ मन्यथापि पुलकै" रिति पाठे, तथाच इयमुर्व्वश्येव, अन्यथा कर-स्पर्शात् मम गात्रकं पुलकैः कलितं कथं जातमित्यन्वयः । चन्द्रस्ये-वांशुभिरिति पाठे व्यतिरेके उपमा ।

उर्व्व। हला! देईए दिषो महाराओ; अदो मे प्पणयवदी विअ सरीरसङ्गदम्हि; मा क्खु मं पुरोभाइणि त्ति समत्थेहि। * (१)

विदू। कधं इधज्जेव तुम्हाणं अत्थं इदो सुरो!। † (२)

राजा। (उर्व्वशीमवलोक्य)

देव्या दत्त इति यदि व्यापारं व्रजसि मे शरीरेऽस्मिन्।
प्रथमं कस्यानुमते चोरितमयि! मे त्वया हृदयम्॥ ‡

चित्र। वअस्स! निरुत्तरा एसा; मम सम्पदं विस्सम्भिअं सुणीअदु। (३)

राजा। अवहितोऽस्मि।

---

(१) अयि! देव्या दत्तो महाराजः; अतोऽस्य प्रणयवतीव शरीरसङ्गतास्मि; मा खलु मां पुरोभागिनीति समर्थय।

(२) कथमिहैव युवयो रस्तमितः सूर्य्यः।

(३) वयस्य! निरुत्तरा एषा; मम साम्प्रतं विश्रब्धिः श्रूयताम्।

---

* पुरोभागिणी दोषैकदर्शिनी अनौचित्यप्रवर्त्तिनीत्यर्थः। दोषैकदृक् पुरोभागीत्यमरः।

† इहैव दिवाभाग एव। रात्रौ करणीयस्यालिङ्गनादिकस्य दिवाभागएव विधानदर्शनात् कथमित्यादिकं परिहासपूर्व्वक मुक्तम्।

‡ व्यापारम् आलिङ्गनाद्यारम्भम्। 'चोरित मयि मे' इत्यत्र 'चौरि! हृतं मे' इति 'चोरित मपि मे' इति च पाठान्तरम्।

चित्र । वसन्ताणन्तरं उण्हसमए भअवं सुज्जो मए उवअरिदव्वो ; ता जधा इअं पिअसही सग्गस्स ण उक्कण्ठेदि तधा वअस्सेण कादव्वं । (१)

विदू । किंवा सग्गे सुमरिदव्वं, ण तत्थ खाईअदि, ण वा पीअदि केवल मणिमिसेहिं अच्छीहिं मीणदा अवलम्बीअदि । (२)

राजा । वयस्य ! अनिर्द्देश्यसुखं स्वर्गं कथं विस्मारयिष्यते ।*

अनन्यनारीसामान्यो दासस्त्वायं पुरूरवाः ॥

चित्र । अणुग्गहिदम्हि ; हला उव्वसि ! अकादरा भविअ विसज्जेहि मं । (३)

उर्व्व । (चित्रलेखां परिष्वज्य सकरुणम्) । सहि ! मा क्खु मं विसुमरेसि । (४)

चित्र । (सस्मितम्) । वअस्सेण संगदा तुमं मए एव्वं जाचिदव्वा । (५)

(इति राजानं प्रणम्य निष्क्रान्ता)

---

(१) वसन्तानन्तरम् उष्णसमये भगवान् सूर्य्यो मयोपचरितव्यः ; तस्माद्-यथा इयं प्रियसखी स्वर्गस्य नोत्कण्ठते तथा वयस्येन कर्त्तव्यम् । उपचरितव्य उपस्थातव्यः आराधयितव्य इत्यर्थः ।

(२) किं वा स्वर्गे स्मर्त्तव्यं, न तत्र खाद्यते, न वा पीयते, केवलमनिमिषै रक्षिभि र्मीनतावलम्ब्यते ।

(३) अनुगृहीतास्मि, अयि उर्व्वशि ! अकातरा भूत्वा विसर्ज्जय माम् ।

(४) सखि ! मा खलु मां विस्मरिष्यसि ।

(५) वयस्येन सङ्गता त्वं मया एवं याचितव्या ।

---

* अनिर्द्देश्यम् इयत्तया निर्द्देष्टुम् अशक्यं सुखं यत्र तादृशम्, अलौकिकसुखास्पदमित्यर्थः ।

विदू । दिट्ठिआ मणोरहसिद्धीए वड्ढदु भवं । (१)

राजा । इमां तावन्मनोरथसिद्धिं पश्य ।

सामन्तमौलिमणिरञ्जितपादपीठ मेकातपत्रमवने र्न तथा प्रभुत्वम् ।
अस्याः सखे! चरणयोरहमद्य कान्तमाज्ञाकरत्वमधिगम्य यथा कृतार्थः॥

उर्व्व । णत्थि मे वाआविहवो अदो अवरं मन्तिदुं । (२)

राजा । (उर्व्वशीं हस्तेनावलम्ब्य) अहो! अविरुद्धसंवर्द्धन- मेतदिदानीमीप्सितलम्भानाम् । *

यतः । पादास्तएव शशिनः सुखयन्ति गात्रं,
बाणास्तएव मदनस्य ममानुकूलाः ।

---

(१) दिष्ट्या मनोरथसिद्ध्या वर्द्धतां भवान् ।

(२) नास्ति मे वाचाविभवो ऽतोऽपरं मन्त्रयितुम् ।

---

* एतत् वक्ष्यमाणं चन्द्रपादादिकम् इदानी मधुना समागमसमये इत्यर्थः, ईप्सितलम्भानां प्रियतमाद्यभिलषितप्राप्तीनां 'सदभिहितभावो द्रव्यवत् प्रकाशते' इति न्याया ल्लब्धेप्सितानामित्यर्थः, अविरुद्ध मविरोधः भावे क्तः, आनुकूल्यमिति यावत्, तस्य संवर्द्धनं सम्पादकम् । यत् खलु चन्द्रपादादिकमितःपूर्व्वमुद्दीपकतयातिसन्तापकमासीत् तदेवाधुना सम्भोगानुकूलतया सुखदं भवतीत्यहो आश्चर्य्यम् । केचित्तु, ईप्सितलम्भानामिति कर्त्तरि षष्ठी, ईप्सितलम्भानां समागमाद्यभिलषितप्राप्तीनाम् इदानी मधुना एतत् अनिर्व्वचनीयम् अविरुद्धसंवर्द्धनमानुकूल्यसम्पादनमिति व्याचक्षते ।

संरम्भरुक्षमिव सुन्दरि ! यद्यदासीत्,
त्वत्सङ्गमेन मम तत्तदिवानुनीतम् ॥ *

उर्व्व । अवरद्धाम्हि चिरआरिआ महाराअस्स । (१)

राजा । सुन्दरि ! मा मैवम् ।

यदेवोपनतं दुःखं सुखं तद्धि रसान्तरम् ।
निर्व्वाणाय तरुच्छाया तप्तस्य हि विशेषतः ॥ †

---

(१) अपराद्धास्मि चिरकारिका महाराजस्य ।

---

* यद्यद्वस्तु चन्द्रकिरणमदनवाणादिकं संरम्भरुक्षमिव त्वदप्राप्तिसमये रोषकषायमिवासीत् ; विरहोद्दीपकानां हि चन्द्रादीनां विरहिभिः सोढुमशक्यतया संरम्भरुक्षत्वेनोत्प्रेक्षा । चन्द्रादीनामुद्दीपकत्व मुक्तं दर्पणे, "चन्द्रचन्दनरोलम्बरुताद्युद्दीपनं मत" मिति । तत्तद्वस्तु त्वत्सङ्गमेन कर्त्रा मम सम्बन्धे अनुनीतमिव प्रशमितक्रोधमिव ; चन्द्रादेः सम्भोगानुकूलतया अनुनीतत्वेनोत्प्रेक्षा ।

† यदेव वस्तु दुःखं दुःखजनकं सत् उपनतम् उपस्थितं तद्धि तदेव रसेन अन्तरं व्यवधानं यस्य तत् रसविशेषे परिणतमित्यर्थः तादृशं सत् सुखं सुखजनकं भवति । प्रकृते चन्द्रपादादिकं विरहोद्दीपकतया विप्रलम्भशृङ्गारे एव दुःखजनकं सम्भोगे पुनरनुकूलतया सुखप्रदमिति ; तथाहि, तरोर्वृक्षस्य छाया तप्तस्यातपतापितस्य ननु शीतार्त्तस्य विशेषतो विशेषेणैव निर्व्वाणाय सुखाय भवति । "सुखं तद्वत्सरान्तर" मिति पाठे वत्सरशब्देनात्र कालमात्रोपलक्षणं ; तथाच यद्वस्तु यस्मिन् काले दुःखप्रदं तद्धि ततोऽन्यस्मिन् काले सुखप्रदं भवति । तरुच्छाया हेमन्ते दुःखप्रदा ग्रीष्मे तु सुखप्रदेति तात्पर्य्यम् । "यदेवोपनतं दुःखात् सुखं तद्रसवत्तर" मित्यपि क्वचित् पाठः । रसवत्तरं स्वादयुक्तं, कष्टलब्धं हि वस्तु समधिकप्रियतया सुखदं भवतीति तदर्थः ।

विदू। भोदि! सेविदा पदोसरमणीआ चन्दवादा; समओ दे गेहप्पवेसस्स। (१)

राजा। तेन हि सख्याः मार्गमादेशय।

विदू। इदो इदो भोदी। (२)

(इति परिक्रामन्ति)।

राजा। सुन्दरि! इयमिदानीं मे प्रार्थना।

उर्व्व। कीरिसी सा?। (३)

राजा। अनधिगतमनोरथस्य पूर्व्वं शतगुणितेव गता मम त्रियामा।
यदि तु तव समागमे तथैव प्रसरति सुभ्रु! ततः कृती भवेयम्॥

(इति निष्क्रान्ताः)।

(तृतीयोऽङ्कः समाप्तः)

---

(१) भवति! सेविताः प्रदोषरमणीया चन्द्रपादाः; समयस्ते गृह-प्रवेशस्य।

(२) इतइतो भवती।

(३) कीदृशी सा!।

## अथ चतुर्थोऽङ्कः ।

( नेपथ्ये सहजन्याचित्रलेखयोः प्रावेशिक्याक्षिप्तिका ) । *

पिअसहि-विओअ-विमणा सहिसहिआ वाउला समुल्लवइ ।
सूरकर-फंस-विअसिअ-तामरसे सरवरुत्सङ्गे ॥ † ( १ )

( ततः प्रविशति सहजन्या चित्रलेखा च )

चित्र । ( प्रवेशान्तरे द्विपदिकया दिशोऽवलोक्य ) ‡

---

(१) प्रियसखी-वियोग-विमनाः सखीसहिता व्याकुला समुल्लपति ।
सूर्य्यकरस्पर्शविकसिततामरसे सरोवरोत्सङ्गे ॥

---

* प्रावेशिकी प्रवेशसूचिका । आक्षिप्तिका गीतिविशेषः, तल्लक्षणमाह भरतः । 'चञ्चत्पुटादितालेन मार्गत्रयविभूषिता । आक्षिप्तिका स्वरपदग्रथिता कथिता बुधै' रिति ।

† पियसहीति, उर्व्वशीवियोगहृतचेता श्चित्रलेखा सहजन्याख्यया सख्या सह सरोवरतीरे समुपविश्य विलपतीत्यर्थः । समुल्लवइ इत्यत्र समुल्लसइ इति क्वचित् पाठः, समुल्लसतीति सं । अत्र गाथाच्छन्दः ; तल्लक्षणमुक्तं पिङ्गले । 'पढमं वारहमत्ता वीए अट्ठारहेण संजुत्ता । जह पढमं तह तीअं दहपञ्चविभूसिआ गाहा' इति ।

‡ द्विपदिका नाम गीतिविशेषः, तल्लक्षणमाह भरतः । 'शुद्धा खण्डा च मात्रा च सम्पूर्णेति चतुर्व्विधा । भवेद्द्विपदिका गीति र्भरतेन प्रकीर्त्तिता । भवेच्चतुर्भि श्चरणै स्त्रयोदशकलात्मकै' रिति ॥ कला मात्रा । द्विपदिकया दिशोऽवलोक्य अग्रिमां गाथां पठतीत्यर्थः ; दिशोऽवलोक्य द्विपदिकया वदतीत्यर्थं इति वा । एवमन्यथापि व्याख्येयम् ।

सहअरि-दुक्खालिद्धअं सरवरअम्मि सिणिद्धअं ।
वाहो-वग्गिअ-णअणअं तम्मइ हंसीजुअलअं ॥ * (१)

सह । ( सखेदम् ) सहि चित्तलेहे ! मिलाअमाण-सअवत्तकसणा दे मुहच्छाआ हिअअस्स असुत्थिदं सूएदि ; ता कधेहि मे अणिव्विदिकारणं, जेण दे समाणदुक्खा होमि । (२)

चित्र । सहि ! अच्छरा-वावारपज्जाएण तत्थभअदो सुज्जस्स उअत्थाणे वट्टन्ती, पिअसहीए विणा वसन्तसमओ आअदो त्ति, बलिअं उक्कण्ठिदो म्हि † (३) ।

---

(१) सहचरीदुःखालीढकं सरोवरे स्निग्धकम् ।
वाष्पवल्गितनयनकं ताम्यति हंसीयुगलकम् ॥

(२) सखि चित्रलेखे ! म्लायच्छतपत्रकृष्णा ते मुखच्छाया हृदयस्य अस्वस्थतां सूचयति ; तत् कथय मे अनिर्वृतिकारणं येन ते समान-दुःखा भवामि ।

(३) सखि ! अप्सरोव्यापारपर्य्यायेण तत्रभवतः सूर्य्यस्योपस्थाने वर्त्तमाना, प्रियसख्या विना वर्षत्समय आगत इति, बलवदुत्कण्ठिताऽस्मि ।

---

• सहचरीदुःखेनालीढ माक्रान्तम् । स्निग्धकं स्नेहपरायणम् । वाष्पवल्गितनयनकं वाष्पजलाकुलनेत्रकम् । ताम्यति खिद्यते । प्रकृते उर्व्वशीविरहदुःखितं सखीद्वयं सरोवरतीरे रोदितीत्यर्थः ।

† अप्सरसां व्यापारः सूर्य्योपस्थानक्रिया तस्य पर्य्यायेण क्रमेण । वर्षत्समयो वर्षाकालः । 'वसन्तसमओ' इति पाठो न सङ्गतः 'नव-जलधरः सन्नद्धोऽय' मिति 'नववारिधरोदयादहोभि' रित्यादिभि-रनन्तरोक्तै वर्षासमयस्यैव वर्णितत्वात् ।

सह । सहि! श्राणामि वो श्रणोाणगदं पेम्मं ; तदो तदो? । (१)

चित्र । तदो इमेसुं दिश्रसेसुं को णु हि वुत्तन्तो वट्टदि ? त्ति प्पणिधाणट्ठिदाए मए श्रच्चाहिदं उश्रलद्धं * (२)।

सह । केरिसं तं ? (३) ।

चित्र । (सकरुणम्) उव्वसी किल तं राएसिं लच्छीसणाहं गेण्हिश्र श्रमच्चेसुं निवेसिदरज्जधुरं केलाससिहरुद्देसे गन्धमादणवणं विहरिदुं गदा (४) ।

सह । (सश्लाघम्) सहि! सो सम्भोश्रो जो तारिसेसुं प्पदेसेसुं ; तदो तदो ? (५) ।

---

(१) सखि! जानामि युवयोरन्योन्यगतं प्रेम ; ततस्ततः ? ।

(२) तत एषु दिवसेषु कोनु हि वृत्तान्तो वर्त्तते ? इति प्रणिधान-स्थितया मया अत्याहितमुपलब्धम् ।

(३) कीदृशं तत् ? ।

(४) उर्व्वशी किल तं राजर्षिं लक्ष्मीसनाथं गृहीत्वा अमात्येषु निवेशितराज्यधुरं कैलासशिखरोद्देशे गन्धमादनवनं विहर्त्तुं गता । लक्ष्मीसनाथं शोभामात्रसहायम् एकाकिनमिति यावत् ।

(५) सखि! स सम्भोगो य स्तादृशेषु प्रदेशेषु ; ततस्ततः । प्रदेशेषु भवतीति शेषः ।

---

* अत्याहितं महद्भयं, जीविताशारहितं साहसकर्म्म वा, अत्या-हितं महाभीतिः कर्म्म जीवानपेक्षि चेत्यमरः । कोणु हि इत्यत्र को णो इति पाठान्तरम् । कोनष इति सं ।

चित्र। तदो तहिं मन्दाइणीतीरे सिकदापव्वदेहिं कीलमाणा उदअवती णाम विज्जाहरदारिआ तेण राएसिणा खणं णिज्झाइद त्ति कदुअ कुविदा मे पिअसही उव्वसी। * (१)।

सह। असहणा † क्खु सा; दुरारूढ़ो अ से पणओ; ता भविदव्वदा एत्थ बलवदी; तदो तदो ? (२)

चित्र। तदो सा भत्तुणो अणुणअं अप्पडिवज्जमाणा गुरुसाव-संमूढ़हिअआ विसुमरिद-देवदा-णिअमा कण्णआजण-परिहरणीअं कुमारवणं पविट्ठा; पवेसाणन्तरं अ काण-णोवन्तवत्तिलदाभावेण परिणदं से रूवम्। ‡ (३)

---

(१) तत स्तत्र मन्दाकिनीतीरे सिकतापर्व्वतैः क्रीड़न्ती उदकवती-नाम विद्याधरदारिका तेन राजर्षिणा क्षणं निध्यातेति कृत्वा कुपिता मे प्रियसखी उर्व्वशी।

(२) असहना खलु सा; दूरारूढ़श्चास्याः प्रणयः; तस्माद्भवितव्य-तात्र बलवती। ततस्ततः?।

(३) ततः सा भर्त्तुरनुनयमप्रतिपद्यमाना गुरुशापसंमूढ़हृदया विस्मृतदेवतानियमा कन्यकाजनपरिहरणीयं कुमारवनं प्रविष्टा; प्रवेशानन्तरञ्च काननोपान्तवर्त्तिलताभावेन परिणतमस्या रूपम्।

---

* सिकतापर्व्वतैः बालुकाविरचितक्रीड़ापर्व्वतैः। विद्याधरदारिका विद्याधरस्य कन्या। निध्याता सानुरागमवलोकिता। निर्व्वर्णनन्तु निध्यानं दर्शनालोकनेक्षणमित्यमरः।

† असहमाना इति पाठान्तरम्। तच्च न मनोरमम्।

‡ गुरो नाटकाचार्य्यस्य भरतस्य शापो दिव्यज्ञानाभावरूपः तेन

सह। (सशोकम्) सव्वधा णत्थि विहिणो अलङ्घणीअं णाम, जेण तारिसस्स रूवस्स अणारिसोज्जेव परिणामो संवुत्तो ; तदो तदो ?। (१)

चित्र। तदो सोवि तस्सिंज्जेव काणणे पिअसहीं अणेसअन्तो उम्मत्तीभूदो इदो उव्वसी तदो उव्वसी त्ति कदुअ अहोरत्ताइं अदिवाहेदि। (नभोऽवलोक्य) एदिणा उण निव्विदाणं पि उक्कण्ठाआरिणा मेहोदएण अप्पदी-आरो भविस्सदि त्ति तक्केमि। (२)

(अत्रान्तरे जम्भलिका) *

(१) सर्व्वथा नास्ति विधे रलङ्घनीयं नाम, येन तादृशस्य रूपस्य अन्यादृश एव परिणामः संवृत्तः ; ततस्ततः ?।

(२) ततः सोऽपि तस्मिन्नेव कानने प्रियसखी मन्विष्यन्नुन्मत्तीभूतः, इत उर्व्वशी तत उर्व्वशीति कृत्वा अहोरात्रानतिवाहयति। एतेन पुनर्निर्वृतानामपि उत्कण्ठाकारिणा मेघोदयेनाप्रतीकारो भविष्यतीति तर्कयामि।

संमूढहृदया विमुग्धमनाः। विस्मृतो देवतायाः कुमारस्य नियमः स्त्रीकर्त्तृक-तदीयवनाप्रवेशरूपो यया सा। कस्याश्चयेतश्च कन्यया-यनेति क्वचित् पाठः। कन्यया शब्दो देशी स्त्रीवाचकः।

* शुद्धा द्विपदिका हि जम्भलिका, यदुक्तं भरतेन ; 'शुद्धा द्विपदिका गीतिः सैव जम्भलिकोच्यते' इति।

सहअरि-दुक्खालिद्धअं सरवरअम्हि सिणिद्धअं।
अविरल-वाहजलोल्लअं तम्मइ हंसीजुअलअं॥ (१)

सह। सहि! अत्थि कोवि समागमोवाओ?। (२)

चित्र। गोरीचरण-राअसम्भवं सङ्गमम्मणिं वज्जिअ कुदो मे समागमोवाओ। (३)

सह। ण ईदिसा आकिदिविसेसा चिरं दुक्खभाइणो होन्ति; ता अवस्सं कोवि अणुग्गहणिमित्तभूओ समागमोवाओ भविस्सदि त्ति तक्केमि। (प्राचीं दिशं विलोक्य) ता एहि उअआहिवस्स भअवदो सुज्जस्स उवत्थाणं करेम्ह। (४)

(अत्रान्तरे खण्डधारा) *

---

(१) सहचरी-दुःखालीढकं सरोवरे स्निग्धकम्।
अविरलवाष्पजलौघकं ताम्यति हंसीयुगलकम्॥

(२) सखि! अस्ति कोऽपि समागमोपायः?।

(३) गौरीचरणरागसम्भवं सङ्गममणिं वर्जयित्वा कुतोऽस्याः समागमोपायः?।

(४) नेदृशा आकृतिविशेषा चिरं दुःखभागिनो भवन्ति; तदवश्यं कोपि अनुग्रहनिमित्तभूतः समागमोपायो भविष्यतीति तर्कयामि; तदेहि उदयाधिपस्य भगवतः सूर्य्यस्योपस्थानं कुर्व्वः। उदयाधिपस्य उदयपर्व्वतोपरि स्थितस्येत्यर्थः।

---

* खण्डाख्या द्विपदिकैव खण्डधारा, यथाह भरतः।
चतुर्द्दशकलायुक्तौ चतुर्भिश्चरणैरिह।
खण्डाख्या द्विपदी गीतिः खण्डधारापि सा भवेदिति।

चिन्तादुम्मिअ-माणसिआ सहअरि-दंसणलालसिआ ।
विअसिअ-कमल-मणोहरए विहरइ हंसी सरवरए ॥ * (१)

( इति निष्क्रान्ते । प्रवेशकः ) ॥ †

( नेपथ्ये पुरूरवसः प्रावेशिक्याक्षिप्तिका )

गहणं गइन्दणाहो पिअ-विरहुम्माअ-पअलिअ-विआरो ।
विसइ तरु-कुसुम-किसलअ-भूसिअ-णिअदेह-पब्भारो ॥ ‡ (२)

( ततः प्रविशत्याकाशबद्धलक्ष्यः सोन्मादो राजा )

राजा । ( सक्रोधम् ) आ दुरात्मन् रक्षः ! तिष्ठ तिष्ठ, मम

---

(१) चिन्तादूनमानसिका सहचरीदर्शनलालसिका ।
विकसितकमलमनोहरे विहरति हंसी सरोवरे ॥

(२) गहनं गजेन्द्रनाथः प्रियाविरहोन्मादप्रकटितविकारः ।
विशति तरुकुसुमकिसलयभूषितनिजदेहप्राग्भारः ॥

---

* प्रकृते उर्व्वशीविरहकातरा तत्सखी तदन्वेषणाय सरोवरतीरे भ्रमतीत्यर्थः ।

† प्रवेशकस्य लक्षणं यथा,—
'प्रवेशकोऽनुदात्तोक्त्या नीचपात्रप्रयोजितः ।
अङ्कद्वयान्तर्व्विज्ञेयः शेषं विष्कम्भके यथा' इति ।

‡ निजदेहः प्राग्भारः पर्व्वताग्रमिव, प्राग्भारवदुन्नतः इत्यर्थः ।
शैलाग्रे शिखरं प्रह्वं दन्तः प्राग्भार इत्यपीति त्रिकाण्डशेषः । प्रकृते, उर्व्वशीविरह-दुःखेन प्राप्तोन्मादावस्थो राजा तदन्वेषणाय गहनं प्रविशतीत्यर्थः ।

प्रियतमामादाय क्व गच्छसि ?। (विलोक्य) कथं शैलशिखराद्गगनमुपेत्य बाणैर्मामभिवर्षति।

(इति लोष्ट्रं गृहीत्वा हन्तुं धावन्, अनन्तरे द्विपदिकया दिशोऽवलोक्य)

हिअआहिअ-पिअदुक्खओ सरवरए धुअपक्खओ।
वाहो-वग्गिअ-णअणओ तम्मइ हंसजुआणओ॥ (१)

(विभाव्य सकरुणम्) कथम्

नवजलधरः सन्नद्धोऽयं, न दृप्तनिशाचरः,
सुरधनुरिदं दूराकृष्टं, न नाम शरासनम्।
अयमपि पटुर्धारासारो, न बाणपरम्परा,
कनकनिकषस्निग्धा विद्युत्, प्रिया मम नोर्वशी॥ *

(इति मूर्च्छितः पतति। पुनर्द्विपदिकयोत्थाय निश्वस्य)

---

(१) हृदयाहितप्रियादुःखकः सरोवरे धुतपक्षकः।
वाष्पवल्गित-नयनकः ताम्यति हंसयुवकः॥

---

* नामेत्यव्ययं विस्मये स्मरणे वा; नाम कोपेऽभ्युपगमे विस्मये स्मरणेऽपिचेति मेदिनी। कनकनिकषस्निग्धा कनकस्य सुवर्णस्य निकषो निकषणं 'कृदभिहितभावो द्रव्यवत् प्रकाशते' इति न्यायात् निकषोपलोपरि कषितकनकलेखेत्यर्थः, तद्वत् स्निग्धा चिक्कणा उज्ज्वलेत्यर्थः। स्निग्धं, स्नेहयुते चिक्कणेऽपि स्यादिति मेदिनी।

मज्जि जाणिअं, मिअलोअणिं णिसिअरु कोवि हरइ ।
जाव णु णवतलि-सामल्ल धाराहरु वरिसेइ ॥ * (१)

(इति सकरुणं विचिन्त्य) तत् खलु क नु गता स्यात् ?। क्कापि

तिष्ठेत् कोपवशात् प्रभावपिहिता ?, दीर्घं न सा कुप्यति ;
स्वर्गायोत्पतिता भवेत् ?, मयि पुनर्भावार्द्रमस्या मनः ।

(सरोषम्)

तां हर्त्तुं विबुधद्विषोऽपि हि न मे शक्ताः पुरोवर्त्तिनीं ;
सा चात्यन्तमगोचरं नयनयोर्यातेति कोऽयं विधिः ॥ †

(द्विपदिकया दिशोऽवलोक्य निश्वस्य साश्रम्) अहो ! अपराद्धभागधेयानां दुःखं दुःखानुबद्धमेव । ‡

---

(१) मया ज्ञातं, मृगलोचनीं निशाचरः कोऽपि हरति ।
यावत् नु नवतड़िच्छ्यामलो धाराधरो वर्षति ॥

---

* केचित्तु वरिसेइ इत्यत्र करिसेइ इति पठित्वा, यावत् नु नवतड़ितं श्यामलो धाराधरः कर्षतीति व्याचख्यते ।

† अत्र प्रभावपिहितेति भवेदिति चेत्यनन्तरं, नैतत् यत इति पदानि न्यूनानि, तेषां पदानां न्यूनतायामपि एतद्वाक्यचतुष्टयस्य वितर्काख्यव्यभिचारिभावस्योत्कर्षाकारणा न गुणः ; दीर्घं न सेत्यादिवाक्यजन्यया च प्रतिपत्त्या तिष्ठेदित्यादिवाक्यप्रतिपत्तेर्बाधः स्फुटमेवावभासते इति न दोष इति दर्पणकारः ।

‡ अपराद्धभागधेयानाम् अप्रतिनिवृत्तभाग्यानां केवलदौर्भाग्यफलभोगिनामिति यावत्, दुःखं दुःखानुबद्धमेव दुःखान्तरसङ्कुलमेव, भाग्यविपर्य्यये दुःखं दुःखान्तरमनुबध्नातीत्यर्थः, छिद्रेष्वनर्था बहुलीभवन्तीति भावः ।

कुतः ?। अयमेकपदे तया वियोगः प्रियया चोपनतः सुदुःसहो मे।
नववारिधरोदया दहोभिर्भवितव्यञ्च निरातपत्वरम्यैः॥ *

( अनन्तरे चर्चरी )॥ †

जलहर ! संहर एह कोव मइ आणत्तओ,
अविरल-धारासाराक्कन्त-दिसामुहओ।
ए ! मज्झि पुहवि भमन्ते जइ पिअ पेक्खिहिमि,
तव्वे जं जु करीहिसि, तं तु सहीहिमि॥ ‡ (१)

( चर्चरिकया विचिन्त्य )। §

वृथा खलु मया मनसः सन्तापवृद्धिरुपेक्ष्यते। यदा मुनयो-

---

(१) जलधर ! संहर अत्र कोपं मया आज्ञप्तकः,
अविरलधारासाराक्रान्तदिङ्मुखः।
अये ! अहं पृथिवीं भ्रमन् यदि प्रियां प्रेक्षिष्ये,
तदा यद्यत् करिष्यसि तत्तत् सहिष्ये॥

---

* एकपदे तत्क्षणे; स्यात्तत्क्षण मेकपदमिति विश्वः। उपनत उपस्थितः। निरातपत्वरम्यैः आतपाभावात् सुखजनकैः। निरातपत्ररम्यैरिति पाठे मेघावृततपनतया छत्रप्रयोजनाभावादतिरमणीयैरित्यर्थः।

† चर्चरी गीतिविशेषः, कदाचित्तु रागभेदः।

‡ अत्र प्रियाविरहसमये कोपं, मां प्रति कृतमिति शेषः, संहर निवारय; आज्ञप्तकः प्रभोर्ममादेशमनुपालयन्नित्यर्थः। मज्झि तव्वे जंजु इत्यादि अहं तदा यद्यदित्याद्यर्थे देशी। एह कोव इत्यादौ एहको पइ आढत्तओ इति क्वचित्तु पाठः, एषकश्त्वमास्थापित इति सं।

§ चर्चरिकया विचिन्त्येयादौ चर्चरिका गतिविशेष स्थानविशेषो वा।

ऽप्येवं व्याहरन्ति 'राजा कालस्य कारण' मिति। * तत् किमहमेनं जलधरसमयं प्रत्यादिशामि?। †

( विहस्य उत्थाय, यदा मुनयोऽप्येवं व्याहरन्तीति पुनः पठित्वा )

भवतु प्रत्यादिशामि।

( अनन्तरे चर्चरी )।

गन्धुम्माइअ-मङ्कअर-गीएहिं
वज्जन्तेहिं परहुअतूरेहिं।
पसरिअ-पवणुव्वेल्लिअ-पल्लव-णिअरू
सुललिअ-विविहपआरे णच्चइ कप्पअरू॥ ‡ (१)

---

(१) गन्धोन्मादित-मधुकरगीतै र्वाद्यमानैः परभृततूर्य्यैः। प्रसृतपवनोद्वेल्लित-पल्लवनिकरः सुललितविविधप्रकारेण नृत्यति कल्पतरुः।

---

* राज्ञःकालकारणत्वमुक्तं श्रीमन्महाभारते, यथा, 'कालो वा कारणं राज्ञो राजा वा कालकारणम्। इति ते संशयो माभूद्राजा कालस्य कारणम्। दण्डनीत्यां यदा राजा सम्यक् कार्त्स्न्येन वर्त्तते। तदा कृतयुगं नाम कालसृष्टं प्रवर्त्तते। दण्डनीत्यां यदा राजा त्रीनंशाननुवर्त्तते। चतुर्थमंशमुत्सृज्य तदा त्रेता प्रवर्त्तते। अर्द्धं त्यक्त्वा यदा राजा नीत्यर्थमनुवर्त्तते। ततस्तु द्वापरो नाम स कालः संप्रवर्त्तते। दण्डनीतिं परित्यज्य यदा कार्त्स्न्येन भूमिपः। प्रजाः क्लिश्नात्ययोगेन प्रवर्त्तेत तदा कलि' रिति। अत्र सत्यादिकालकारणत्वेनोक्तमपि वाक्यमुन्मत्ततया राज्ञा वर्षादिकालकारणत्वेन व्यवस्थापितम्।

† प्रत्यादिशामि निराकरोमि भर्त्सयामीत्यर्थः।

‡ वसन्तसमयवर्णनेन जलधरसमयं प्रत्यादिशति गन्धोन्मादितेति। अत्र गीतैरिति तूर्य्यैरिति चोपलक्षणे तृतीया। प्रसृतेन इतस्ततः सञ्चरता पवनेन उद्वेल्लितः सञ्चालितः पल्लवनिकरो यस्य सः। एतेन पल्लवनिकरस्य करत्वं गम्यते।

( तेन नर्त्तित्वा )

अथवा न प्रत्यादिशामि; यत् प्रावृषेण्यैरेव चिह्नैः संप्रति महाराजोपचारः क्रियते। *

( विहस्य पुनर्गन्धुम्माद्दत्र इति पठित्वा )

कथमिति ?।

विद्युल्लेखा-कनकरुचिरश्री वितानं ममाब्दो
व्याधूयन्ते निचुलतरुभि र्मञ्जरीचामराणि।
घर्म्मच्छेदात् पटुतरगिरो वन्दिनो नीलकण्ठा
धारासारोपनयनपरा नैगमा स्याम्बुवाहाः॥ †

---

* प्रावृषेण्यै र्वर्षाकालोत्पन्नैः। महाराजोपचारः महाराजोपयुक्त वितानचामरादिपरिच्छदः। महाराजोपचार इत्यत्र मम राजोपचार इति क्वचित् पाठः।

† महाराजोपचारं वर्णयन्नाह विद्युल्लेखेति; विद्युल्लेखेव कनकस्य सुवर्णस्य रुचिरश्री र्मनोहररचनाविशेषो यस्य सः, श्री र्वेशरचना शोभेति मेदिनी। तादृशोऽब्दो मेघो मम वितानं सुवर्णचित्रित चन्द्रातप इत्यर्थः। ममाभ्रमिति पाठे विद्युल्लेखेति पृथक् पदं, साहि मम कनकरुचिरश्रीरित्यन्वयः। तथा निचुलतरुभि रिज्जलाख्यवृक्षै र्वेतसवृक्षै र्वा मञ्जर्य्य एव चामराणि व्याधूयन्ते सञ्चाल्यन्ते। तथा घर्म्मच्छेदात् ग्रीष्मावसानात् पटुतरगिरो मधुरस्वरा नीलकण्ठा मयूरा वन्दिनः स्तुतिपाठकाः; वर्षागमे हि मयूराणां स्वरो मधुरो भवतीति प्रसिद्धिः। तथा धारा जलधारा एव साराणि धनानि तेषामुपनयनपरा आनयनतत्परा अम्बुवाहा मेघा नैगमा वणिजो नागरिका वा। नैगमः स्यादुपनिषद्वणिजो र्नागरेऽपिचेति मेदिनी। नैगमाः सानुमन्त इति पाठे सानुमन्तः पर्व्वताः। नैगमाः साधुमन्त इति पाठो न सङ्गतः।

( पुनश्चर्चरी ) भवतु ; किं परिच्छदश्लाघया । यावदस्मिन् कानने प्रियां प्रनष्टामन्वेषयमि । *

( पाठस्यान्तरे भिन्नकः ) †

दइआ-रहिओ अहिअं दुहिओ विरहाणुगओ परिमन्थरओ ।
गिरिकाणणए कुसुमुज्जलए गअजूहवई उअ झीणगई ॥ (१) ‡

( अनन्तरे द्विपदिकया परिक्रम्यावलोक्य च, सहर्षम् )

हन्त हन्त ! व्यवसितस्य मे संवर्द्धनं वृत्तम् । §

आरक्तकोटिभिरियं कुसुमै र्नवकन्दली मलिनगर्भैः ।
कोपादन्तर्वाष्पे स्मरयति मां लोचने तस्याः ॥ ¶

---

(१) दयितारहितोऽधिकं दुःखितो विरहानुगतः परिमन्थरकः ।
गिरिकाननके कुसुमोज्ज्वलके गजयूथपति र्व्रूहस्व क्षीणगतिः ॥

---

* अन्वेषयामीति स्वार्थे णिङ् ।

† भिन्नको रागविशेषः ।

‡ गिरिकानने भ्रमतीति क्रियाध्याहार्य्या । ऊहस्व वितर्कय पश्येत्यर्थः । करिणीविरहितस्य गजपतेः स्वरूपवर्णनेन राज्ञा स्वावस्था प्रकटीकृता । उअ इत्यत्र 'तह' इति क्वचित् पाठः, तथेति सं ।

§ व्यवसितस्य प्रियान्वेषणरूपव्यवसाये प्रवृत्तस्य मे मम संवर्द्धनं व्यवसायस्येति शेषः, यद्वा व्यवसितं व्यवसायः भावे क्तः, मे मम व्यवसितस्य व्यवसायस्य प्रियान्वेषणरूपस्य संवर्द्धनं वृद्धिर्वृत्तं जातम्, सदृशवस्तुदर्शनादिना प्रियान्वेषणप्रवृत्ते र्बलवत्त्वादिति भावः ।

¶ सदृशवस्तुदर्शनमाह आरक्तेति, आरक्तकोटिभि रीषद्रक्ताग्रभागैः । मलिनगर्भै र्मलिनमध्यभागैः । एतेन तारकासाम्यं गम्यते । आरक्तराजिभिरिति, सलिलगर्भै रितिच पाठे राजी रेखा । राजिः स्त्री पङ्क्तिलेखयोरिति मेदिनी । सलिलगर्भै रित्यनेन वाष्पसाम्यं गम्यते । स्मरयतीत्यत्र "स्मृ आध्याने" इत्यनेन घटादित्वाद् ह्रस्वः ।

इतोगतेति कथं मया खलु तत्रभवती सूचयितव्या । यतः,

पद्भ्यां स्पृशेद्वसुमतीं यदि सा सुगात्री
मेघाभिवृष्ट-सिकतासु वनस्थलीषु ।
पश्चान्नता गुरुनितम्बतया ततोऽस्याः
दृश्येत चारुपदपङ्क्ति रलक्तकाङ्का ॥

(द्विपदिकया परिक्रम्यावलोक्य च) हन्त हन्त ! उपलब्ध-मुपलक्षणं, येन तस्याः कोपनायाः सरसमुन्नीयते मार्गः । *

इतोष्ठरागै र्नयनोदविन्दुभि र्निमग्ननाभे र्निपतद्भि रङ्कितम् ।
च्युतं रुषा भिन्नगते रसंशयं शुकोदरश्याममिदं स्तनांशुकम् ॥

भवत्वादास्ये तावत् । (परिक्रम्य विभाव्य च सास्रम्) । कथं सेन्द्रगोपं शाद्वलमिदं स्थानम् ! †; तत् कुतोऽस्मिन् विपिने प्रिया-प्रवृत्ति मागमयेयम् ? । (विलोक्य) अय मासारोच्छलितशैल-तटस्थली-पाषाण मधिरूढः ।

आलोकयति पयोदान् प्रबल-पुरोवात-नर्त्तितशिखण्डः ।
केकागर्भेण शिखी दूरोन्नमितेन कण्ठेन ॥ ‡

---

* उपलक्ष्यते ज्ञायते ऽनेनेत्युपलक्षणं चिह्नम् । सरसं सुन्दरं निःसं-शयमिति यावत् यथा तथा उन्नीयते ज्ञायते ॥

† सेन्द्रगोपम् इन्द्रगोपाख्यो वर्षाप्रारम्भोत्पन्नो लोहितवर्णः कीट-विशेषः, तत्सहितम् । शाद्वलं नवतृणविशिष्टतया हरिद्वर्णम् । 'शाद्वलः शादहरिते' इत्यमरः ।

‡ कण्ठेनेत्युपलक्षणे तृतीया ।

भवतु, यावदेनं पृच्छामि ।

( अनन्तरे खण्डकः ) । *

संपत्त-विसूरणओ, तुरिअं परवारणओ ।
पिअअम-दंसण-लालसओ गअवरु विम्हिअ-माणसओ ॥ † (१)

( तेन खण्डकान्तरे चर्चरी )

वरहिण-पब्भ ! पइ अब्भत्थेमि ; आअक्खहि मे ता,
एत्थ अरणे भमन्ते जइ पइ दिट्ठी सा मज्झ कन्ता ।
णिसम्मइ मिअङ्कसरिसे वअणे, हंसगई ,
ए चिण्हे जाणीहिसि, आअक्खिउ तुज्झ मई ॥ ‡ (२)

---

(१) संप्राप्तविसूरणक स्त्वरितं परवारणकः ।
प्रियतमादर्शन-लालसको गजवरो विस्मितमानसकः ॥

(२) वर्हिणप्रभो ! त्वामभ्यर्थये ; आचक्ष्व मे तत्,
अत्रारण्ये भ्रमता यदि त्वया दृष्टा सा मम कान्ता ।
निशामय, मृगाङ्कसदृशं वदनं, हंसगतिः ।
एत चिह्नं ज्ञास्यसि, आख्यातं तुभ्यं मया ॥

---

* खण्डको गीतिविशेषः, यथाह भरतः । 'पूर्व्वं चतुर्विंशतिभि रष्टाविंशतिभिः परम् । मात्राभिरिह यस्याद्धें खण्डकः स प्रकीर्त्तितः' । 'प्राकृतेन प्रबन्धेन खण्डकः स उदाहृत' इत्यादि च ।

† गजवर्णन व्यपदेशेन स्वावस्थां पुनराह, सम्पत्तेति । विसूरणं खेदः 'खिदे विसूर' इत्यनेन विसूरादेशः ; तत् संप्राप्तं येन सः, प्रियाविरहेणातिदीन इत्यर्थः । परान् शत्रून् वारयति पराजयते इति परवारणः, अतिबलवानित्यर्थः । गजवरो विचरतीति शेषः ।

‡ निशामय पश्य । केचित् सविशेषणं वदनपदं तृतीयान्तं विधाय विशेषणे तृतीयेत्याहुः ।

( चर्चरिकयोपविश्य अञ्जलिं बद्धा ) *

नीलकण्ठ ! ममोत्कण्ठा, वनेऽस्मिन् वनिता त्वया।
दीर्घापाङ्गा सितापाङ्ग! दृष्टा दृष्टिक्षमा भवेत् ? । †

(चर्चरिकया विलोक्य) कथमद्यैव प्रतिवचनं नर्त्तितुमारब्धः।

( पुनश्चर्चरी )।

तत् किं नु खलु प्रहर्षकारणमस्य ?; आं ज्ञातम्।

मृदुपवन-विभिन्नो मत्प्रियायाः प्रणाशात्
घनरुचिर-कलापो निःसपत्नोऽद्य जातः।
रति विगलितबन्धे केशपाशे सुकेश्याः
सति कुसुमसनाथे कं हरेदेष बर्हः ?। ‡

भवतु, परव्यसनसुखितं न पुनरेनं पृच्छामि।

( द्विपदिकया दिशोऽवलोक्य )।

अये! इय मातपान्त-सन्धुक्षितमदा § जम्बूविटप मध्यास्ते परभृता, विहगेषु पण्डितैषा जातिः; यावदेनां पृच्छामि।

---

* चर्चरिकयोपविश्येत्यादौ चर्चरिका गतिविशेषः।

† उत्कण्ठा उत्कण्ठाकारणमित्यर्थः। दृष्टिक्षमा दर्शनयोग्या।

‡ अद्य इत्यत्र अस्य इति क्वचित् पाठः। हरेत् मोहयेत्।

§ आतपान्ते आतपावसाने संधुक्षितः प्रदीप्तोमदो यस्याः सा।

( अनन्तरे खुरकः )। *

विज्जाहर-काणण-लीणओ दुक्खविणिग्गअ-वाह्णपीड़ओ।
दूरोसारिअ-हिअआणन्दओ अम्बरमाणेण भमइ गइन्दओ॥ † (१)

( खुरकानन्तरे चर्चरी )।

परहुअ! महुर-पलाविणि-कन्ती णन्दणवण-सच्छन्द-भमन्ती।
जइ पइ पिअअम सा मह दिट्ठा, ता आअक्खहि मह परपुट्ठा॥ (२)

( एतदेव नर्त्तित्वा वलन्तिकयोपसृत्य जानुभ्यां स्थिता )। ‡

भवति! त्वां कामिनो मदनदूति मुदाहरन्ति,
मानापमान-निपुणं त्व ममोघ मस्त्रम्।
ता मानय प्रियतमां मम वा समीपं,
मां वा नयाशु, मृदुभाषिणि! यत्र कान्ता॥

---

(१) विद्याधर-कानन-लीनको दुःखविनिर्गत-बाष्पोत्पीड़कः।
दूरोत्सारित-हृदयानन्दकोऽम्बरमानेन भ्रमति गजेन्द्रकः।

(२) परभृते मधुरप्रलापिनि! कान्ता नन्दनवने स्वच्छन्दं भ्रमन्ती।
यदि त्वया प्रियतमा सा मम दृष्टा, तदाचक्ष्व मह्यं परपुष्टे!।

---

* खुरको नृत्यविशेषः।

† अम्बरमानेनेति विशेषणे तृतीया, अम्बरमानेन आकाशपरिमिताङ्गः, अत्युन्नत इत्यर्थः।

‡ वलन्तिका रागोपाङ्गविशेषः।

( वामकेन * किञ्चिद्वलित्वा आकाशे ) किमाह भवती ? †
कथं त्वामेव मनुरक्त मपहाय गतेति ? ।

( अग्रतोऽवलोक्य ) भवति !

कुपिता नतु कोपकारणं सकृदप्यात्मगतं स्मराम्यहम् ।
प्रभुता रमणेषु योषितां नहि भावस्खलितान्यपेक्षते ॥ ‡

(ससम्भ्रममुपविश्य, अनन्तरं जानुभ्यां स्थित्वा, कुपितेति पठित्वा, विलोक्य च )

कथं कथाविच्छेदकारिणी स्वकार्य्ये व्यासक्ता । अथवा सुष्ठु खल्विदमुच्यते ।

महदपि परदुःखं शीतलं सम्यगाहुः,
प्रणय मगणयित्वा यन्ममापद्गतस्य ।
अधरमिव मदान्धा पातुमेषा प्रवृत्ता
फल मतिनवपाकं राजजम्बूद्रुमस्य ॥ §

---

* वामकं वामाङ्गपार्श्वस्थित-वस्त्ववलोकन-संस्थानविशेषः, यदुक्तं भरतेन ।

धुतेन शिरसा यत्तु पार्श्वेन वलितेन च ।
तद्वामकं वै करणं पार्श्वस्थस्यावलोकने ॥

† आकाशे लक्ष्यं बद्धा यत् कथनं तदाकाशभाषितम् । यदुक्तम् ।
किं ब्रवीषीति यन्नाट्ये विना पात्रं प्रयुज्यते ।
श्रुत्वेवानुक्तमप्यर्थं तत् स्यादाकाशभाषितम् ॥

‡ भावस्खलितानि प्रणयशैथिल्यानि । प्रणयस्यानन्यथाभावेऽपि ताः कुप्यन्ति किमुतान्यथाभावे इति भावः ।

§ राजजम्बूद्रुमः जम्बूवृक्षविशेषः, पिण्डखर्जूरवृक्षो वा ; राजजम्बूस्तु जम्बूभित् पिण्डखर्जूरयोः स्त्रियामिति मेदिनी ।

तदेवं गतेऽपि * प्रियेव मे मत्सुखनेति न मे कोपोऽस्याम्; सुखमास्तां भवती; साधयामस्तावत् । †

( उत्थाय द्विपदिकया परिक्रम्यावलोक्य च ) ।

अये ! दक्षिणेन वनधारं ‡ प्रियाचरण-विक्षेपशंसी नूपुरशब्दः । यावदेन मनुगच्छामि ।

( ककुभेन, षडुपभङ्गाः ) । §

पिअअम-विरह-किलामिअ-वअणओ,
अविरल-वाहजलाउल-णअणओ ।
दुस्सहदुक्ख-विसंठुल-गमणओ
पसरिअ-उरुताव-दीविअ-अङ्गओ
अहिअं दुम्मिअ-माणसओ दरिअं गओ
काणणे परिभमइ गइन्दओ । ¶ (१)

---

(१) प्रियतमाविरहक्लान्तवदनकोऽविरलवाष्पजलाकुलनयनकः ।
दुःसहदुःखविसंस्थुलगमनकः, प्रसृतोरुतापदीप्ताङ्गकः ।
अधिकं दूनमानसको दरितं गतः कानने परिभ्रमति गजेन्द्रकः ॥

---

* एवं गतेऽपि एवं स्थितेऽपि मत्प्रियाप्रवृत्तिकथने पराङ्मुखत्व-प्रदर्शनेऽपीत्यर्थः ।

† साधयामो गच्छामः, 'प्रायेण ण्यन्तकः साधिर्गमेः स्थाने प्रयुज्यते' इति भरतोक्तेः ।

‡ वनस्य धारः प्रान्तस्तं, 'धारः प्रान्त' इति शब्दरत्नावली, "एनपाद्वितीयाचे" ति द्वितीया ।

§ ककुभो रागविशेषः । षट् उपभङ्गा अवच्छेदाः ।

¶ दुःसहदुःखेन विसंस्थुलगमनो विशृङ्खलगमनः । दरितं भीतिं गतः प्राप्तः ।

(अनन्तरे द्विपदिकया दिशोऽवलोक्य)।

पिअकरिणी-विच्छेदअओ, गुरुसोआणल-दीविअओ।
वाहजलाउल-लोअणओ, करिवर भमइ समाउलओ ॥*(१)

(सकरुणम्)। हा धिक् कष्टम्!।

मेघश्यामा दिशो दृष्ट्वा मानसोत्सुकचेतसा। †
कूजितं राजहंसेन; नेदं नूपुरशिञ्जितम् ॥

(इति पठित्वोत्थाय)

भवतु, यावदेते मानसोत्सुकाः पतत्रिणः सरसोऽस्मान्नोत्पतन्ति, तावदेतेभ्यः प्रियाप्रवृत्तिमागमयेयम्।

(वलन्तिकयोपसृत्य जानुभ्यां स्थित्वा)।

हंहो जलविहङ्गमराज!

पश्चात् सरः प्रतिगमिष्यसि मानसं त्वं
पाथेय मुत्सृज विसं ग्रहणाय भूयः।

---

(१) प्रियकरिणीविच्छेदितको गुरुशोकानलदीपितकः।
वाष्पजलाकुललोचनकः करिवरो भ्रमति समाकुलकः ॥

---

* उन्मादातिशयवशाद्गजव्यपदेशेन पुनः स्वावस्थां वर्णयति प्रिय-करिणीति।

† मानसेन मानसे वा 'प्रसितोत्सुकाभ्यां तृतीया च' इति तृतीया सप्तमी च, उत्सुकं चेतो यस्य स तेन। वर्षासु हंसा मानससरोवरं गच्छन्तीति कविसमयप्रसिद्धिः।

मां तावदुद्धर शुचो दयिताप्रवृत्त्या,
स्वार्थात् सतां गुरुतरा प्रणयिक्रियैव ॥ *

( तिर्य्यगवलोक्य ) ।

अये ! यथा उन्मुखमालोकयति, तथा व्यक्तं, प्रवासोत्सुकमनसा मया न दृष्टेत्याह ।

( उपविश्य, चर्च्चरी ) ।

अरे रे हंसाः ! किं गोदृज्जइ ? । (१)

( इति नर्त्तित्वा उत्थाय )

यदि हंस ! गता न ते नतभ्रूः सरसो रोधसि दृक्पथं प्रिया मे ।
मदखेलपदं कथं नु तस्याः सकलं चौर ! गतं त्वया गृहीतम् ? ॥ †

( गइ अणुसारे मइ लक्खिज्जइ । (२)

---

(१) अरेरे हंसाः ! किं गोप्यते ? ।

(२) गत्यनुसारेण मया लक्ष्यते । मत्प्रियासदृशं तव गमनं दृष्ट्वा त्वयावश्यमेव सा दृष्टेति मया निश्चीयते इत्यर्थः ।

---

* भूयः पुनर्यंहयाय पाथेयं पथि क्षेमं वित्तं स्वयाार्थं गृहीतमिति शेषः, उत्सृज परित्यज, अन्यथा स्पष्टवाक्योच्चारणासम्भवः स्यादिति भावः । दयिताप्रवृत्त्या दयितावृत्तान्तदानेन शुचोविरहशोकात् तावत् प्रथमं माम् उद्धर मम शोकं निवारयेत्यर्थः ।

† मदो नाम स्त्रीणां यौवनाद्यवलेपजातो विकारविशेषः, यदुक्तं दर्पणे 'मदो-विकारः सौभाग्ययौवनाद्यवलेपज' इति । तेन खेलः खेलनं चालनं यस्य तादृशं पदं यस्मिन् तत्, सविलास-सञ्चालितपदमित्यर्थः, तादृशं गतं गमनम् । भावे क्तः ।

( चर्च्चरिकयोपसृत्याञ्जलिं बद्धा )

हंस! प्रयच्छ मे कान्तां, गतिरस्यास्त्वया हृता।
विभावितैकदेशेन देयं यदभियुज्यते * ॥

( पुनश्चर्च्चरी )

कइ पइ सिक्खिअ? ए गइलालस!।
सा पइ दिट्‌ठी जहणभरालस ॥ † (१)

( पुनश्चर्च्चरी। सानुनयं, हंस! प्रयच्छेत्यादि पठित्वा, पुनश्चर्च्चरिकया साक्षेपं हंस प्रयच्छेत्यादि पठित्वा, द्विपदिकया निरूप्य ) एष स्तेनानुशासी राजेत्यतिभयादुत्पतितः ; ‡ यावदन्यमवकाशमवगाहिष्ये।

---

(१) कुत्र त्वया शिक्षितमेतत् गतिलालस!।
सा त्वया दृष्टा जघन-भरालसा ॥

---

* यद्वस्तु अभियुज्यते साधनार्थमर्थिना निवेद्यते धर्म्माधिकरणे इति शेषः, विभावितः साक्ष्यादिभिः साधित एकदेशः अपहृतवस्तुन एकांशो येन तेन प्रत्यर्थिना देयम् अर्थिने दातव्यम्, तत् सर्व्वमिति शेषः ; साहसादिविवादेषु साध्यस्यैकांशे विभावितेऽपि सर्व्वस्य दानमुक्तं कात्यायनेन, 'साध्यार्थांशेऽपि गदिते साक्षिभिः सकलं भवेत्। स्त्रीसङ्गे साहसे चौर्य्ये यत् साध्यं परिकीर्त्तित' मिति।

† हे गतिलालस! गतौ गमनविशेषशिक्षणे लालसा औत्सुक्यं यस्य सः, तत्सम्बुद्धौ ; 'लालसौत्सुक्यतृष्णातिरेकयाच्ञासु च द्वयो'रिति मेदिनी। त्वया एतत्, अर्थात् मत्प्रियासदृशं गमनं कुत्र शिक्षितम्!, यदि त्वया मत्प्रिया नैव दृष्टा, तदा तत्सदृशं गमनं ते कथं जातमित्यर्थः, अतः सा दृष्टैवेति निश्चित्याह सेति। केचित्तु गतिलाघस इत्यत्र गतिलालसमिति पठित्वा, गतिलालसं गमनलालित्यमिति व्याचक्षते।

‡ स्तेनानुशासी चौरदमनकारी।

( द्विपदिकया परिक्रम्यावलोक्य च )

अये ! प्रियासहाय-श्चक्रवाक-स्तिष्ठति ; यावदेनं गच्छामि ।

( अनन्तरे कुटिलिका ) *

मम्मर-रणिअ-मणोहरए,

( मन्दघटी ) †

कुसुमिअ-तरुवर-पल्लविए ‡ ।

( चर्च्चरी )

दइआ विरहुम्माइअओ

काणणे भमइ गइन्दओ । ( १ )

( द्विलयान्तरे § चर्च्चरी )

गोरोअणा-कुङ्कुमवण्णा चक्का भणइ मइ ।
महुवासर कीलन्ती धणिआ ण दिट्ठी पइ ? ॥ ¶ (२)

---

(१) मर्म्मररणित-मनोहरके कुसुमित-तरुवर-पल्लविते ।
दयिता-विरहोन्मादितकः कानने भ्रमति गजेन्द्रकः ।

(२) गोरोचना-कुङ्कुमवर्ण चक्र ! भण माम् ।
मधुवासरे क्रीड़न्ती धन्या न दृष्टा त्वया ? ॥

---

* कुटिलिका नाट्यविशेषः ।

† मन्दघटी नाट्यविशेषः ।

‡ मर्म्मररणिते मर्म्मरध्वनिभि र्मनोहरे । कुसुमितैः सपुष्पै स्तरुवरैः पल्लविते व्याप्ते ।

§ नृत्यगीतवाद्यानां साम्यं लयः, तद्द्वयान्तरे ।

¶ राजा चक्रवाकं पृच्छति गोरोचनेति ।

( चर्च्चरिकयोपसृत्य जानुभ्यां स्थित्वा )

रथाङ्गनामन् ! संत्यक्तो रथाङ्गश्रोणिबिम्बया ।
अयं त्वां पृच्छति रथी मनोरथशतैर्वृतः * ॥

अयं कः क इत्याह ; न किल विदितोऽहमस्य ।

सूर्य्याचन्द्रमसौ यस्य मातामह-पितामहौ ।
स्वयं वृतः पतिर्द्वाभ्या मुर्व्वश्या च भुवा च यः ॥

कथं तूष्णीमेवास्ते !, भवतु, उपालभे तावदेनम् ।

( जानुभ्यां स्थित्वा )

तद्युक्तं तावदात्मानुमानेन वर्त्तितुम् । कुतः ?

सरसि नलिनीपत्रेणापि त्वमावृतविग्रहां
ननु ! सहचरीं दूरे मत्वा विरौषि समुत्सुकः ।
इति च भवतो जायास्नेहात् पृथक्स्थिति-भीरुता,
मयि च विधुरे भावः कोऽयं प्रवृत्ति-पराङ्मुखः ? † ॥

( उपविश्य ) सर्व्वथा मदीयानां भाग्यविपर्य्ययाणामयं प्रभावः । यावदन्यमवकाश मवगाहिष्ये ।

---

* रथाङ्गं चक्रं, तदेव नाम यस्य स रथाङ्गनामा चक्रवाकः, तत्सम्बुद्धौ ; 'कोकश्चक्रश्चक्रवाको रथाङ्गाह्वयनाम चे'त्यमरः । रथाङ्ग ! नामेति पाठान्तरम् । रथी रथस्वामी राजा इत्यर्थः : रथीत्यनेन राजवचनं श्रुत्वा तदुत्तरदाने विलम्बो न विधेय इति व्यज्यते ।

† आवृतविग्रहाम् आच्छादितशरीराम् । 'शरीरं वर्ष्म विग्रह' इत्यमरः । विरौषि प्रियाह्वानार्थं शब्दायसे । विधुरे प्रियाविरह-कातरे । भावः स्वभावो ऽभिप्रायो वा ; 'भावः सत्तास्वभावाभिप्रायचेष्टात्मजन्मसु'इति मेदिनी । प्रवृत्तिपराङ्मुखः वार्त्तामात्रकथने विमुखः ।

( द्विपद्दिकया परिक्रम्यावलोक्यच )। अये !

इदं रुणद्धि मां पद्म मन्तःक्वणितषट्पदम्।
मया दष्टाधरं तस्याः ससीत्कारमिवाननम्॥

इतो गतस्यानुशयो माभूदित्यस्मिन्नपि कमलशये * भ्रमरे प्रणयं करिष्ये।

( अस्यानन्तरे अर्द्धद्विचतुरस्रकः )। †

एक्कक्कम-वड्ढिअ-गुरुअर-पेम्मरसे
सरे हंसजुआणओ कीलइ कामवसे। ‡ (१)

( चतुरस्रकेणोपविश्य अञ्जलिं बद्धा )। §

---

(१) एकक्रमवर्द्धितगुरुतरप्रेमरसः
सरसि हंसयुवकः क्रीड़ति कामवशः।

---

* कमले शेते इति कमलशयस्तस्मिन्। कमलशये इत्यत्र कमल-सेविनीति क्वचित् पाठः।

† नन्द्यावर्त्तापरनामकः संस्थानविशेषो द्विचतुरस्रकः, सच द्विवारं कृतत्वादर्द्धद्विचतुरस्रकः, यदुक्तम्।

अस्यैव चेषरणयो रन्तरं स्याद्‌यदङ्गुलम्।
वितस्तिमात्रमथवा नन्द्यावर्त्तं तदुच्यते॥

अस्यैव प्रकृतसंस्थानस्यैवेत्यर्थः। अयमेव चार्द्धद्विचतुरस्रक इत्याहुः।

‡ कमलशये भ्रमरे प्रणयं करिष्ये इत्युपक्रम्य पुरोदृश्यमानं हंसं वर्णयति, एक्कक्कमेति; एकक्रमेण युगपद्वर्द्धितो गुरुतरः प्रेमरसो यस्य सः। क्रीड़ति हंस्या सहेति शेषः। हंसयुवा क्रीड़ति अहन्तु दुर्दैव-दग्धो न तथेति भावः।

§ नन्द्यावर्त्तप्रमाणाद्धि भवेदष्टादशाङ्गुलम्।
अन्तरं चतुरैः स्थानं चतुरस्रं तदोदितमिति।

मधुकर! मदिराक्ष्याः शंस तस्याः प्रवृत्तिं;
वरतनु-रथवासौ नैव दृष्टा त्वया मे।
यदि सुरभि-मवाप्स्य स्तन्मुखोच्छ्वासगन्धं
तव रतिरभविष्यत् पुण्डरीके किमस्मिन्? ॥ *

(इति द्विपदिकया परिक्रम्यावलोक्य च)

अये! करिणीसहायो नागाधिराजो नीपस्कन्ध-निषण्ण स्तिष्ठति; यावदेनं गच्छामि।

(कुटिलिका)

करिणी-विरह-सन्दाविअओ

(मन्दघटी)। †

काणणए गन्धुद्धुअ-मङ्कअरओ ‡। (१)

(अतोऽन्तरे विलोक्य)। अथवा न तावदयमुपसर्पणकालः।

अयमचिरोद्गत-पल्लवमुपनीतं प्रियतमाग्रहस्तेन।
अभिलषतु तावदासव-सुरभिरसं शल्लकीभङ्गम् ॥ §

---

(१) करिणीविरहसन्तापितकः कानने गन्धोद्धतमधुकरकः।

---

* मदिरत्याभ्यामिति मदिरे मनोनयनहारिणी, तादृशे अक्षिणी यस्याः सा तथा तस्याः। सुरभि घ्राणेन्द्रियतृप्तिजनकः; 'सुरभिर्घ्राण-तर्पण' इत्यमरः।

† मन्दघटी रागभेदो नाट्यविशेषो वा।

‡ करिणीसहाय इत्याद्युपक्रम्य उन्मादातिशयवशात् करिणीविर-हितहस्त्यन्तरवर्णनव्यपदेशेन स्वावस्थां पुनराह करिणीति; कानने एतादृशः करिवरो विचरतीति शेषः।

§ प्रियतमाया अग्रहस्तेन शुण्डाग्रेण। शल्लकी गजभक्ष्या-नामक-वृक्षविशेषः; 'गजभक्ष्या तु सुवहा सुरभीरसा। महेरणा कुन्दुरुकी शल्लकी ह्लादिनीति च' इत्यमरः। तस्या भङ्गः भग्नशल्लकीखण्डकम्।

( स्थानकेनावलोक्य ) *　अये! कृताहारकः संवृत्तः, भवतु, समीपमस्य गत्वा पृच्छामि।

( अनन्तरे चर्चरी )।

हज्जि पज्जि पुच्छिमि, आअक्खहि गअवरु
ललिअ-पहारेण णासिअ तरुअरु।
दूरविणिज्जिअ-ससहरकन्ती
दिट्ठी पिअ पज्जि सम्मुहअन्ती ?॥† (१)

( पदद्वयं पुरत उपसृत्य )।

मदकल! युवतिशशिकला गजयूथप! यूथिकाशवलकेशी।
स्थिरयौवना स्थिता ते दूरालोके सुखालोका॥ ‡

---

(१) अहं त्वां पृच्छामि, आचक्ष्व गजवर! ललितप्रहारेण नाशिततरुवर! दूरविनिर्जित-शशधरकान्ति दृष्टा प्रिया त्वया संमोहयन्ती ?।

---

* स्थानकमालापविशेषः।

† णासिअ इत्यत्र णामिअ इति पाठान्तरम्। नामित इति सं। " ज्वलकलहलनमा अनुपसर्गो वा " इत्यनेन घटादेर्वैकल्पिकतया ह्रस्वाभावः।

‡ मदकल मदमत्त! युवतिशशिकला युवतिषु शशिकला शशिकलावल्लोकललामभूता। यूथिका-शवलकेशी अन्तर्गुम्फित-यूथिका-कुसुमैः शवला विचित्राः केशा यस्याः सा। सुखालोका मनोहर-दर्शना।

( सहर्षमाकर्ण्य )

अहह ! अनेन प्रियोपलब्धि-शंसिना मन्द्रकण्ठगर्जितेन समाश्वासितोऽस्मि । साधर्म्म्याद्भूयसी मे त्वयि प्रीतिः * । कथम् ? इति

मा माऽभूः पृथिवीभुजामधिपतिं नागाधिराजो भवान्
अव्युच्छिन्नपृथुप्रवृत्ति भवतो दानं समानं मम ।
स्त्रीरत्नेषु ममोर्व्वशी प्रियतमा यूथे तवेयं वशा ;
सर्व्वं मामनु ते प्रियाविरहजां त्वन्तु व्यथां मानुभूः ॥ †

सुखमास्तां भवान् ।

( द्विपदिकया परिक्रम्यावलोक्य च )

अये, अयमसौ सुरभिकन्दरो नाम विशेषरमणीयः सानुमान्, प्रियश्चाप्सरसाम् ; अपि नाम सुतनुरस्योपत्यकाया मुपलभ्येत ?

( परिक्रम्यावलोक्यच )

कथमन्धकारः !, भवतु, विद्युत्प्रकाशेनावलोकयामि । कथं मदीये दुरितपरिणामे मेघोदयोऽपि शतह्रदाशून्यः ‡ संवृत्तः ; तथापि शिलोच्चयमेन मद्दृष्ट्वा न निवर्त्तिष्ये ।

---

* साधर्म्म्यात् उभयो राजत्वादि धर्म्मसाम्यात् ।

† अव्युच्छिन्ना अविच्छिन्ना पृथु महती प्रवृत्तिः प्रवाहः पक्षे प्रवर्त्तनं व्यापारो वा यस्य तत्, 'प्रवृत्तिस्तु प्रवाहे स्या दुदन्ते च प्रवर्त्तने' इति मेदिनी । दानं मदजलं पक्षे वितरणम् ; दानं गजमदे त्यागे इति मेदिनी । वशा करिणी । मामनु मम समानम् ।

‡ शतह्रदा विद्युत्, तच्छून्यः ।

( अनन्तरे खण्डिका ) *

खरखुर-दारिअ-मेद्दणिओ वणगहणे अविअलु ।
परिसप्पइ पेच्छह लीणो णिअकज्जुज्जुअ कोलु ॥ † (१)

अपि वनान्तरमल्पभुजान्तरा श्रयति पर्व्वत! पर्व्वसु सन्नता ।
इयमनङ्गपरिग्रह-मङ्गला पृथुनितम्ब! नितम्बवती तव ? ॥ ‡

कथं तूष्णीमेवास्ते! शङ्के, विप्रकर्षान्न § शृणोति; भवतु, समीपमस्य गत्वा पृच्छामि ।

---

(१) खरखुरदारितमेदिनीको वनगहने ऽविचलः ।
परिसर्पति पश्यत लीनो निजकार्य्योद्युक्तः कोलः ॥

---

* खण्डिका गीतिविशेषो गद्यविशेषो वा ।

† वराहवर्णनव्यपदेशेन राजस्वभाववर्णनमिदम् । अविचलः भये-ऽपि अप्रकम्प्यः, पक्षे धीरः । निज कार्य्ये कन्दोत्पाटनादिरूपे, पक्षे प्रियान्वेषणरूपे, उद्युक्तः कृतोद्योगः, कोलो वराहः । 'वराहः शूकरो घृष्टिः कोल'इत्यमरः ।

‡ अल्पं भुजान्तरं भुजमध्यं वक्षःस्थलमिति यावत् यस्याः सा, स्तनयोः पीवरत्वातिशयादिति भावः । पर्व्वसु अङ्गसन्धिषु कटिप्रभृतिषु सन्नता अवनता क्षीणा इत्यर्थः । अनङ्गपरिग्रहः कामपत्नी तद्वन्मङ्गला रति-रिव शुभलक्षणसम्पन्ना इत्यर्थः । 'परिग्रहः परिजने पत्न्यां स्वीकार-मूलयो'रिति मेदिनी । पृथुनितम्ब स्थूलकटक !, इदं पर्व्वतस्य विशे-षणम् । नितम्बवती प्रशस्तनितम्बा । अल्पभुजान्तरादिविशेषणचतु-ष्टयम् उर्व्वशीपरिज्ञानाय चिह्नत्वेनोक्तम् ।

§ विप्रकर्षात् दूरात् ।

( अनन्तरे चर्चरी )

फलिअ-सिलाअल-णिम्मल-णिज्झरु !
बहुविअकुसुमे विरइअ-सेअरु ! ।
किण्णर-महुरुग्गीअ-मणोहरु !
देक्खावहि मह्ह पिअअम महिअरु ! ॥ (१)

( चर्चरिकयोपसृत्याञ्जलिं बद्धा । )

सर्व्वक्षितिभृतां नाथ ! दृष्टा सर्व्वाङ्गसुन्दरी ।
रामा रम्ये वनान्तेऽस्मिन् मया विरहिता त्वया ? ॥ *

( तथैव प्रतिशब्दं शृणोति । आकर्ण्य सहर्षम् )

कथं ! यथाक्रमं दृष्टेत्याह ; भवतु, अवलोकयामि ।

---

(१) स्फटिक-शिलातल-निर्म्मलनिर्भर बहुविधकुसुमे विरचितशेखर ।
किन्नर-मधुरोद्गीत-मनोहर दर्शय मम प्रियतमां महीधर ! ॥

---

* अत्र प्रश्नपक्षे पर्व्वतः, उत्तरपक्षे राजा सम्बोध्यः । मया विरहिता रामा उर्व्वशी त्वया दृष्टा ! इति प्रश्नः ; त्वया विरहिता रामा मया दृष्टेत्युत्तरम् । अत्र प्रश्नवाक्यस्यैवोत्तरत्वेन योजनात् पद्यमिदं निगताख्यस्य वीथ्यङ्गस्य उदाहरणम् । तल्लक्षणमुक्तं दर्पणे, 'त्रिगतं स्यादनेकार्थयोजनं श्रुतिसाम्यत' इति । चतुर्थचरणे त्वया इत्यत्र 'नु या' इति क्वचित् पाठः, सच न मनोरमः ।

( दिशोऽवलोक्य सखेदम् )

कथं ममैवायं कन्दरान्तरविसर्पी * प्रतिशब्दः ! ।

( इति मूर्च्छति । उत्थायोपविश्य सविषादम् )

अहह ! श्रान्तोऽस्मि ; यावदस्या गिरिनद्यास्तीरे तरङ्गवात-मासेविष्ये ।

( द्विपदिकया परिक्रम्यावलोक्य च )

इमां नवाम्बुकलुषां स्रोतोवहां पश्यता मया रतिरुपलभ्यते ; कुतः ?

तरङ्गभ्रूभङ्गा क्षुभित-विहगश्रेणि-रसना
विकर्षन्ती फेनं वसनमिव संरम्भशिथिलम् ।
यथा जिह्मं याति स्खलितमभिसन्धाय बहुशो,
नदीभावेनेयं ध्रुवमसहमाना परिणता ॥ †

भवतु, प्रसादयामि तावदेनाम् ।

---

* कन्दरान्तरविसर्पी गुहामध्यप्रसारी ।

† तरङ्गा भ्रूभङ्ग इव यस्याः सा ; फेनं वसनमिवेति लिङ्गात् । तथा क्षुभिता स्तरङ्गवेगात् चञ्चलाः, सशब्दाश्चेत्यपि वक्तव्यम्, अन्यथा रसनासाम्यस्य अङ्गवैकल्यं स्यात्, ये विहगा हंसादयः तेषां श्रेणी रसना काञ्चीव यस्याः सा । संरम्भेण प्रणय-कोपेन शिथिलं भ्रष्ट-नीविकम् । जिह्मं कुटिलं यथा तथा, यथा याति, तथा मन्ये, स्खलितं स्खलनम् उदयवती-दर्शनरूपं ममापराधमित्यर्थः, बहुशो वारंवारम् अभिसन्धाय मनसि निधाय असहमाना इयमुर्व्वशी नदीभावेन नदीत्वेन परिणता नदीरूपं प्राप्तेत्यर्थः । ध्रुव मुत्प्रेक्षायाम् । असहमानेत्यनेन अपराधलवमपि न सहते इति प्रतीयते । यथा जिह्ममित्यत्र यथाविद्ध-मिति, असहमानेत्यत्र असहना सेति च पाठान्तरम् । आविद्धं कुटिलम् ; 'आविद्धो वाच्यलिङ्गः स्यात् कुटिले च पराहते' इति मेदिनी ।

पसिअ, पिअअम सुन्दरिए णए !
खुहिअ-करुण-विहङ्गमए णए।
सुरसरितीर-समूसुअ-एणए
अलिउल-झङ्कारिअ एणए॥ * (१)

---

(१) प्रसीद, प्रियतमे सुन्दरिके नदि !
क्षुभित-करुण-विहङ्गमके नत्या।
सुरसरित्तीर-समुत्सुकैणके,
अलिकुल-झङ्कारिते एनया॥

---

* प्रियां नदीभावमापन्ना मवगम्य प्रसादयितुं प्रणौति पसिअ इति। हे प्रियतमे सुन्दरिके नदि! नदीरूपे उर्व्वशि! त्वम् एनया नत्या नमस्कारेण प्रसीद प्रसन्ना भव, मत्कृतनमस्कारेण नदीभावं विहाय आलिङ्गनादिना मा मनुगृहाणेत्यर्थः। प्रियतमे मयीति केचित्; तन्मते सप्तम्यन्तमिदम्। क्षुभितकरुणेत्यादिकमयं नदि! इत्यस्य विशेषणम्। क्षुभिताः नदीभावापनयनप्रवृत्तं मामवलोक्य स्वाश्रय-विनाश-शङ्कया चकिताः, अतएव करुणाः करुणस्वरा विहङ्गमा हंसादयो यस्यां तत्-सम्बुद्धौ। तथा सुरसरितो गङ्गायाः सुरसरिद्रूपाया स्तवेत्यर्थः, तीरे समुत्सुक एणो मृगो यस्याः तत्सम्बुद्धौ। सुरसरिदिति सम्बोधनान्तं पृथक् वा पदम्, नदि इत्यस्य विशेषणम्, हे सुरसरिन्नदि! गङ्गारूपधारिणि! इत्यर्थकम्। समुत्सुकेनके इति पाठे समुत्सुक इनः पति र्यस्याः तत्सम्बुद्धौ; 'इनः पत्यौ नृपार्कयो'रिति मेदिनी। तथा अलिकुलझङ्कारिते कमल-मकरन्द-लोभादागत-भ्रमर-संघझङ्कारविशिष्टे। क्षुभितेत्यादिविशेषणत्रयेण, त्वमपराश्रय-दानाभिरता, अहन्तु त्वयि नितरामनुरक्तोऽपि परित्यक्तोऽस्मीत्यहो ते परापरपरिज्ञानानभिज्ञतेति व्यज्यते। पुस्तकान्तरे पाठान्तरं दृश्यते। तत् यथा,

पसिअ पिअअम सुन्दरिए खुहिअ-करुण-विहङ्गमए।
सुरसरितीर-समूसुअए अलिउल-झङ्कारिअए णइ!।
प्रसीद प्रियतमे सुन्दरिके! क्षुभितकरुणविहङ्गमके!।
सुरसरित्तीरसमुत्सुकके! अलिकुल झङ्कारितके नदि! इति सं।

(तेन कुटिलिकान्तरे चर्च्चरी)

पुव्वदिसा-पवणाहअ-कल्लोलुग्गअ-बाहुओ,
मेहङ्गे णच्चइ सललिअं जलणिहि-णाहओ।
हंस-रहङ्ग-सङ्ख-कुङ्कुम-कआभरणु,
करि-मअराउल-कसण-कमल-कआवरणु।
वेला-सलिलुव्वेल्लिअ-हत्थदिण्णुतालु,
ओत्थरइ दसदिस रुन्धेइ णवमेहआलु॥ * (१)

---

(१) पूर्व्वदिक्-पवनाहत-कल्लोलोद्गत-बाहुको,
मेघाङ्के नृत्यति सललितं जलनिधिनायकः।
हंस रथाङ्ग शङ्ख कुङ्कुम कृताभरणः,
करिमकराकुल-कृष्णकमल-कृतावरणः।
वेला-सलिलोद्वेल्लित-हस्तदत्ततालः,
अवस्तृणाति दशदिशो रुद्धा नवमेघकालः।

---

* उन्मादातिशयवशात् नदीं समुद्रत्वेन कलयन् नर्त्तकत्वेन वर्णयति, पुव्वदिसेति। पूर्व्वदिक्-पवनेन आहतः कल्लोल एव उद्गतो बाहु र्यस्य सः। रथाङ्गश्चक्रवाकः, कुङ्कुमः काश्मीरादिदेशजातो गन्धद्रव्यविशेषः, जलचरप्रकरणे कुङ्कुमग्रहणमुन्मत्तवाक्यत्वेन न दूषणावहम्; हंसादिभिः कृतान्याभरणानि येन सः। 'कुङ्कुम-कआभरणु' इत्यत्र 'कङ्कमअराभरणु' इति पाठान्तरम्; कङ्कः पक्षिविशेषः, मकरो जलजन्तुविशेषः; एतत्पाठे, मकरपदस्य द्विवारोच्चारणादनवीकृतत्वमुन्मत्तवाक्यतया सोढव्यम्। क्वचित् 'कुङ्कुमसङ्ककआभरणु' इति पाठः। वस्तुतस्तु, कुङ्कुम इत्यत्र कुम्मअ इति साधीयान् पाठः, कूर्म्मक इति सं; एतत् पाठे न प्रकरणभङ्गो नाप्यनवीकृतत्वदोष इति सुधीभि र्विभाव्यम्। तथा करिभि र्जलहस्तिभिः मकरैश्च आकुलं व्याप्तं यत् कृष्णकमलं नीलाब्जं; 'कमलं सलिले ताम्रे जलजे क्लोम्नि भेषजे' इति मेदिनी।

( चर्च्चरिकयोपसृत्य जानुभ्यां स्थित्वा )

त्वयि निबद्धरतौ प्रियवादिनि प्रणयभङ्ग-पराङ्मुख-चेतसि।
क मपराधलवं मयि पश्यसि ? त्यजसि मानिनि! दासजनं यतः ॥*

कथं तूष्णीमेवास्ते! अथवा, परमार्थतः सरिदियं, नोर्व्वशी; अन्यथा, कथं पुरूरवसमपहाय समुद्राभिसारिणी भवेत्! अनिर्व्वेद प्राप्याणि श्रेयांसि; भवतु, तमेवोद्देशं गच्छामि, यत्र मे नयनयोः सा सुनयना तिरोहिता। ( परिक्रम्यावलोक्य च। ) इमं तावत् प्रिया-प्रवृत्तये सारङ्गमासीन मभ्यर्थये।

---

तेन कृतम् आवरणं नीलोत्तरीयं येन सः। उत्तरीयमपि करिमकर-प्रतिकृतिभि र्खचितं क्रियते। तथा वेलायां तीरे; 'वेला स्यात्तीर-नीरयो' रिति विश्वः। सलिलस्य यदुद्वेल्लितम् उद्वेल्लनं, भावे क्तः, आघात इत्यर्थः तेन दत्तो हस्ततालो येन सः। हस्तदत्ते त्यत्र प्राकृते पूर्व्वनिपातनियमाभावात् दत्तहस्तेति ज्ञेयम्। यद्वा वेलासलिलो-द्वेल्लितं क्तदभिहित-भावतया वेलोद्वेल्लित-सलिलमित्यर्थः, तदेव हस्तः, तेन दत्त स्तालो येन सः, एतादृशो जलनिधिनाथको नृत्यति, नवमेघ-कालस्य दश दिशो गळा अवलगाति आच्छादयति। ओत्थरइ अवतरति, गज्जेइ गर्ज्जतीति केचित्। अपरे च 'ओत्थरइ' इति 'णवमेहआलु' इति च सप्तम्यन्तं पठित्वा, नवमेघकाले दश दिशो गळा अवलगाति आच्छादयति सति जलनिधिनाथो नृत्य-तीति व्याचक्षते।

* त्वयि निबद्धरतौ नितरा-मासक्ते, प्रियवादिनि प्रियभाषण-तत्परे। प्रणयस्य भङ्गात् पराङ्मुखं निवृत्तं चेतो यस्य; प्रणयभङ्गे प्रणयभङ्गविषये पराङ्मुखम् अनिच्छुकमित्यर्थः, चेतो यस्येति वा, तस्मिन्। केचित् निबद्धरतावित्यादिकं मयीत्यन्तं सप्तम्यन्तपदजातं मथन्तं विधाय पठन्ति।

अभिनव-कुसुम-स्तवकित-तरुवरस्य परिसरे
मदकल-कोकिल-कूजित-मधुप-झङ्कार-मनोहरे ।
नन्दनविपिने निजकरिणी-विरहानलेन सन्तप्तो
विचरति गजाधिपति रैरावतनामा ॥ *

( गलितकः † । जानुभ्यां स्थित्वा )

कृष्णसारच्छवियोऽयं दृश्यते काननश्रिया ।
नवशष्पावलोकाय कटाक्ष इव पातितः ॥

( विलोक्य )

अयमन्तिकमायान्तीं शिशुना स्तनपायिना ।
अनन्यदृष्टिस्तामेव मृगीं रुद्धां निरीक्षते ॥ ‡

( चर्चरी )

सुरसुन्दरी जहणभरालस पीणुत्तुङ्ग-घणत्थणी,
त्थिरजोव्वण तणुसरीरि हंसगइ । §

---

* नन्दनवने करिणीविरहितैरावत-भ्रमणवर्णनव्यपदेशेन स्वावस्थां पुनः प्रकटयति अभिनवेति । एतादृशविशेषणविशिष्टे वने परिभ्रमण-वर्णनं विरहातिशयं द्योतयति ।

† गलितको नाट्यविशेषः ।

‡ अयं हरिणीपतिः कृष्णसार इत्यर्थेनान्वयः । स्तनपायिना शिशुना रुद्धामिति योज्यम् । अन्तिकमायान्तीं मृगीमित्यनेन त्वरित मुर्व्वशी लप्स्यते इति व्यज्यते ।

§ सुरसुन्दरी अप्सराः अतएव स्थिरयौवना ; सुरसुन्दरीत्वं हि स्थिरयौवनत्वे हेतुः, मर्त्यानां स्थिरयौवनत्वाभावात् ।

गअणुज्जल-काणणे मिअलोअणि भमन्ती,
दिट्ठु पइँ? तइविरह-समुद्दन्तरे उत्तरहि मइँ ॥ * (१)

(उपसृत्याञ्जलिं बद्धा)। हंहो हरिणीपते!

अपि दृष्टवानसि? मम प्रियां वने, कथयामि ते तदुपलक्षणं, शृणु।
पृथुलोचना सहचरी यथैव ते, सुभगा तथैव खलु सापि वीक्षते ॥ †

(विलोक्य)।

कथमनादृत्य मद्वचनं कलत्राभिमुखं स्थितः!; सर्व्वथा उपपद्यते परिभवास्पदं विधिविपर्य्ययः। यावदन्यमवकाश मवगाहिष्ये।

---

(१) सुरसुन्दरी जघनभरालसा पीनोत्तुङ्गघनस्तनी,
स्थिरयौवना तनुशरीरा हंसगतिः।
गगनोज्ज्वल-कानने मृगलोचना भ्रमन्ती
दृष्टा त्वया!, तद्विरहसमुद्रान्तरादुत्तारय माम् ॥

---

* गगनवदुज्ज्वलं निर्म्मलं काननं गगनोज्ज्वलकाननं: काननस्य महत्त्वनीलत्वादिसाधर्म्यसम्बन्धाद्गगनतुल्यत्वम्। एतादृशविशेषणविशिष्टा मत्प्रिया यदि त्वया दृष्टा, तदा तद्वृत्तान्तकथनेन मां विरहसमुद्रादुत्तारयेत्यर्थः। भ्रमन्ति भ्रमता त्वयेति वा।

† अपिः प्रश्नार्थकः। उपलक्ष्यते ज्ञायतेऽनेनेत्युपलक्षणं, तदुपलक्षणं तत्परिज्ञानचिह्नम्। पृथुलोचना ते तव सहचरी हरिणी यथैव वीक्षते पश्यति, सुभगा सापि तथैवेत्यर्थः।

(परिक्रम्यावलोक्य च)

हन्त! दृष्टमुपलक्षणं तस्या मार्गस्य
रक्तकदम्बः सोऽयं प्रियया घर्म्मान्तशंसि यस्येदम्।
कुसुम मसमग्रकेशर-विषममपि कृतं शिखाभरणम्॥ *

(परिक्रम्यावलोक्य च)।

तत् किं णु खलु शिलाभिदगतं नितान्तरक्तमिदमवलोक्यते?
प्रभाल्लेपी, नायं हरिहत-गजस्यामिषलवः;
स्फुलिङ्गः स्यादग्नेर्गहनमभिवृष्टं पुनरिदम्।
अये!, रक्ताशोकस्तवक-समरागो मणिरयं,
यमुद्धर्त्तुं पूषा व्यवसित इवालम्बितकरः॥ †
भवत्वादास्ये तावत्।

---

* कदम्बस्य विकाराः कदम्बानि कदम्बकुसुमानि, तानि रक्तानि यस्य सः; रक्तकदम्बोहि वर्षागमे कुसुमितो भवतीति प्रसिद्धिः। असमग्रकेशर-विषममपि सद्योजाततया असम्पूर्णविकसितमपीत्यर्थः।

† प्रभया स्वतेजसा लिम्पति व्याप्नोतीति प्रभाल्लेपी। हरिः सिंहः; 'हरिश्चन्द्रार्कवाताश्व शुक भेक यमाहिषु। कपौ सिंहे हरेऽजेऽंशौ' इति मेदिनी। तेन हतस्य गजस्य आमिषलवो मांसखण्डो न स्यात् प्रभाल्लेपित्व मामिषलवनिषेधे हेतुः। आमिषलवस्य सुरक्त इति विशेषणं देयम्, अन्यथा सादृश्याभावतया सन्देहानुपपत्तेः। इदं गहनं वनमभिव्याप्य वृष्टं वह्निरभूत्। इदम् अग्निस्फुलिङ्गनिराकरणे हेतुः। पूषा सूर्य्यः। व्यवसित उद्युक्तः।

( ग्रहणं नाटयति )।

पणइणि-बड्ढासाहिअओ * वाह्पाउल-णिअ-णअणओ।
गअवइ गहणे दुहिअओ परिभमइ किलामिअ-वअणओ॥ (१)

( द्विपदिकयोपसृत्य गृहीत्वात्मगतम् )।

मन्दारपुष्पैरधिवासितायां यस्याः शिखायामय-मर्पणीयः।
सैवं प्रिया संप्रति दुर्लभा मे मैवैनमस्रूपहतं करोमि †॥

( इत्युत्सृजति )।

( नेपथ्ये ) वत्स! गृह्यतां, वत्स! गृह्यताम्।

सङ्गमनीयो मणिरिह शैलसुता-चरण-रागयोनि-रयम्।
आवहति धार्य्यमाणः सङ्गममाशु प्रियजनेन ‡॥

राजा। ( ऊर्द्धमवलोक्य )। को मा मनुशास्ति? (विलोक्य) कथं भगवान् मृगराजधारी!, भगवन्! अनुगृहीतोऽहम् अमुनोपदेशेन।

( मणिमादाय )। हंहो सङ्गमणे!

तया विमुक्तस्य निमग्नमध्यया भविष्यसि त्वं यदि सङ्गमाय मे।
ततः करिष्यामि भवन्तमात्मनः शिखामणिं बालमिवेन्दुमीश्वरः॥

---

(१) प्रणयिनी-बद्धाशाहितको वाष्पाकुल-निज-नयनकः।
गजपति र्गहने दुःखितकः परिभ्रमति क्लान्त-वदनकः॥

---

* प्रणयिन्यां बद्धया आशया अतितृष्णया अर्दितः पीड़ितः।
† अस्रुणा नेत्रजलेन उपहतं दूषितम्।
‡ सङ्गमनीयः सङ्गमनीयनामा। शैलसुतायाः पार्व्वत्या चरणयो रागेण अलक्तकरसेन योनिरुत्पत्ति र्यस्य सः। आवहति जनयति।

(परिक्रम्यावलोक्य च) तत् किं खलु कुसुमरहितामपि लतामिमां पश्यता मया रतिरुपलभ्यते ? ; अथवा स्थाने मम मनो रमते ; इयं हि,

तन्वी मेघजलार्द्र-पल्लवतया धौताधरेवाश्रुभिः,
शून्येवाभरणैः स्वकाल-विरहाद्विश्रान्त-पुष्पोद्गमा।
चिन्तामौनमिवास्थिता मधुलिहां शब्दै र्विना लक्ष्यते,
चण्डी मामवधूय पादपतितं याता प्रकुप्येव सा॥ *

यावदस्यां प्रियानुकारिण्यां लतायां परिष्वङ्गप्रणयी भवामि।

लए ! पेक्ख विसहिअए भवामि,
जइ विहिजोए पुणु तहिं पाविमि।
ता रणेवि ण करेमि णिब्भन्ती
पुणु णइ मेल्लइ ताइ कअन्ती॥ † (१)

(इति चर्चरिकयोपसृत्य लतामालिङ्गति। ततस्तदीय-स्थान माक्रम्येव प्रविष्टोर्व्वशी)

---

(१) लते ! प्रेक्षस्व विन्नहृदयो भवामि,
यदि विधि-योगेन पुनस्त्वां प्राप्नोमि।
तदारण्येऽपि न करोमि निर्भ्रान्तिं,
पुन र्नहि प्रवेशयामि तां कृतान्ताम्॥

---

* स्वकालविरहात् पुष्पोत्पत्ति-समयाभावात्। चण्डी अति-कोपना ; 'चण्डी त्वत्यन्तकोपना' इत्यमरः। प्रकुप्येव इत्यत्र प्रकुपितेति क्वचित् पाठः, स चाशुद्धतया प्रतीयते, प्रपूर्व्वात् कुप्यतेस्तरे क्तप्रत्यये कृते "क्त क्तवतो रिगुपान्तेऽर्दः" इत्यनेन इडागमे जाते प्रकुपितेति भवितु मर्हत्वात्।

† विन्नहृदयः सुखितमानसः त्वद्दर्शनेनैवेति शेषः। विधि दैवम् ;

राजा । (निमीलिताक्षः स्पर्शं नाटयित्वा) अये ! उर्व्वशी-
गात्रस्पर्शादिव निर्वृतं मे हृदयं ! ; न पुनरस्ति
विश्वासः । कुतः ?

समर्थये यत् प्रथमं प्रियां प्रति,
क्षणेन तन्मे परिवर्त्तते ऽन्यथा ।
अतो विनिद्रे सहसा विलोचने
करोमि न स्पर्श-विभावित-प्रियः ॥ *

(शनैरुन्मील्य चक्षुषी) कथं सत्यमेवोर्व्वशी ! । (इति मूर्च्छितः पतति)

उर्व्वशी । समस्ससदु समस्ससदु महाराओ । (१)

---

(१) समाश्वसितु समाश्वसितु महाराजः ।

---

'विधि र्विधाने दैवे चे'त्यमरः । तस्य योगः सम्बन्धस्तेन, दैवबलेनेत्यर्थः । निर्भ्रान्तिं निःशेषेण भ्रमणम् । कृतोऽन्तो विनाशो विनाशवदति-दुःखप्रद-व्यापारो मत्परित्यागरूपो यया सा तादृशीं तां पुन र्न प्रवेशयामि अरण्ये नानयामीत्यर्थः ।

* यत् वस्तु मदादिकं प्रथमं दर्शनसमकाल एवेत्यर्थः प्रियां प्रति समर्थये प्रियात्वेन निश्चिनोमि इयमुर्व्वश्येव नान्यदिति स्थिरीकरोमीत्यर्थः, तद्वस्तु क्षणेन क्षणकालेनैव मे मम सम्बन्धे अन्यथा अन्यरूपेण परिवर्त्तते रूपान्तरितं भवतीत्यर्थः । अतः कारणात् स्पर्शेन स्पर्श-जनित-सुखानुभवेन विभाविता परिज्ञाता अनुमिता वा प्रिया येन तादृशोऽहं विलोचने निरतिशय-सुखानुभवा-न्निमीलिते नेत्रे सहसा विनिद्रे उन्मीलिते न करोमि, यदीयं परमार्थतः प्रिया न स्यात्तदा मे पुनर्दुःखातिशयो भवेदित्येतदमेव चक्षुरुन्मीलनाकरणे हेतुः ।

राजा । (संज्ञां लब्ध्वा) प्रिये ! अद्य जीवितम् ।

त्वद्वियोगभवे चण्डि ! मया तमसि मज्जता ।
दिष्ट्या प्रत्युपलब्धासि चेतनेव गतासुना ॥

उर्व्व । मरिसदु महाराओ, जं मए कोववसं गदाए अवत्यन्तरं पाविदो महाराओ । (१)

राजा । नाहं प्रसादयितव्यस्त्वया, त्वद्दर्शनेन प्रसन्नो मे स बाह्यान्तरात्मा ; * तत् कथय, कथमियन्तं कालं मया विरहिता स्थितासि ?

(अनन्तरे चर्चरी)

मोरा-परहुअ-हंस-रहङ्गं
अलि-गअ-पव्वअ-सरिअ-कुरङ्गं ।
तुज्झह कारण रण्ण भमन्ते
को णहु पुच्छिअ मज्झि रोअन्ते । (२)

उर्व्व । एव्वं अन्तक्करण-पच्चक्खीकिद-वुत्तन्तो महाराओ । (३)

---

(१) मर्षयतु महाराजो यन्मया कोपवशं गतया अवस्थान्तरं प्रापितो महाराजः ।

(२) मयूर-परभृत-हंस-रथाङ्गम्, अलि-गज-पर्व्वत-सरित्-कुरङ्गम् ।
तव कारणादरण्ये भ्रमता को न खलु पृष्टो मया रुदता ॥

(३) एवमन्तःकरण-प्रत्यक्षीकृतवृत्तान्तो महाराजः ।

---

* बाह्यात्मा कर्म्मेन्द्रियाणि वाक् पाणि पाद पायूपस्थरूपाणि, अन्तरात्मा बुद्धीन्द्रियाणि चक्षु र्जिह्वा नासिका त्वक् श्रोत्ररूपाणि ।

राजा। प्रिये! अन्तःकरणमिति न खल्ववगच्छामि।

उर्व्वी। सुणादु महाराओ! पुरा भअवदा महासेणेण सासदं कुमारव्वदं गेह्णिअ, अअं सअलकलुसो णाम गन्धमादन-कच्छो अज्झासिदो, किदा अ त्थिदी। * (१)

राजा। कीदृशी?

उर्व्वी। जा किल इत्थिआ इमं पदेसं आगमिस्सदि सा लदाभाए परिणदरूआ भविस्सदि; गोरोचरण-राअसम्भवं मणिं वज्जिअ अ लदाभाअं ण मुच्चिस्सदित्ति। तदो अहं गुरुसाव-संमूढ़हिअआ † विसुमरिद-देवदा-णिअमा अन्नकाजण-परिहरणीअं कुमारवणं पविट्ठा; पवेसा-णन्तरं अ काणणोवन्तवत्तिणा लदाभाएण परिणदं मे रूअं। (२)

---

(१) शृणोतु महाराजः; पुरा भगवता महासेनेन शाश्वतं कुमार-व्रतं गृहीत्वा अयं सकलकलुषो नाम गन्धमादनकच्छोऽध्यासितः; कृता च स्थितिः।

(२) या किल स्त्री इमं प्रदेशमागमिष्यति सा लताभावे परिणत-रूपा भविष्यति; गोरीचरणरागसम्भवं मणिं वर्जयित्वा च लताभावं न मोक्ष्यतीति। ततोऽहं गुरुशाप-संमूढ़हृदया विस्मृतदेवतानियमा, अन्यकाजन-परिहरणीयं कुमारवनं प्रविष्टा; प्रवेशानन्तरञ्च कानना-पान्तवर्त्तिना लताभावेन परिणतं मे रूपम्।

---

* महासेनः कार्त्तिकेयः; 'कार्त्तिकेयो महासेन' इत्यमरः। गन्ध-मादनस्य तदाख्यपर्व्वतस्य कच्छः प्रान्तभागः।

† गुरो भरतमुनेः। शापो दिव्यज्ञानाभावरूपः, तेन संमूढ़ं विमुग्धं हृदयं यस्याः सा।

राजा । प्रिये ! सर्व्वमुपपन्नम् ।

रतिखेदसुप्तमपि मां शयने या मन्यसे प्रवासगतम् ।
सा त्वमिहैतदवस्थं कथं सहेथा श्चिरवियोगम् ? ॥

इदञ्चैतत् यथा-कथितं सङ्गमनिमित्तं पुनरुपलब्धप्रभाव-मस्माभिः ।

( इति मणिं दर्शयति )

उर्व्व । कधं अम्हो ! सङ्गमणीओ अअं मणी !, अदोञ्जेव महा-राएण आलिङ्गिदञ्जेव पद्दिदित्यम्हि संवुत्ता ! । ( १ )

राजा । ( ललाटे मणिं सन्निवेश्य )

स्फुरता विच्छुरितमिदं रागेण मणे र्ललाट-निहितस्य ।
श्रियमुद्वहति मुखं ते बालातप-रक्तकमलस्य ॥ *

उर्व्व । पिअंवद ! महन्तो क्खु कालो अम्हाणं पइट्ठाणदो

---

(१) कथम् आश्चर्य्यम् सङ्गमनीयोऽयं मणिः !, अतएव महाराजेना-लिङ्गितैव प्रकृतिस्थास्मि संवृत्ता ! ।

---

* ललाटनिहितस्य मणेः स्फुरता दीप्तिमता रागेण रक्तिमवर्णेन विच्छुरितं रञ्जितम् इदं पुरोवर्त्ति ते तव मुखं बालातप-रक्त-कमलस्य प्रातःकालीन-तरणि-किरण-रञ्जित-पद्मस्य श्रियं शोभाम् उद्वहति धारयतीत्यन्वयः ।

निग्गदाणं ; कदाइ असूदस्सन्ति पइदीओ ; ता एहि गच्छम्ह। (१)

राजा। यदाह भवती। (इत्युत्तिष्ठतः)।

उर्व्वशी। अध, कधं उण महाराओ गन्तुं इच्छदि ? (२)

राजा। अचिरप्रभा-विलसितैः पताकिना
सुरकार्मुकाभिनव-चित्र-शोभिना।
गमितेन खेलगमने! विमानतां
नय मां नवेन वसतिं पयोमुचा॥ †

---

(१) प्रियंवद! महान् खलु काल आवयोः प्रतिष्ठाना न्निर्गतयोः; कदाचिदसूयिष्यन्ति प्रकृतयः; तदेहि गच्छावः।

(२) अथ, कथं पुन र्महाराजो गन्तु मिच्छति ?।

---

† हे खेल-गमने! सलील-गमने! अचिरप्रभा विद्युत्, तस्या विलसितै र्विलासैः, भावेक्तः, स्फुरणैरित्यर्थः, 'क्तदभिहित-भावो द्रव्यवत् प्रकाशते' इति न्यायात् विलसिताचिरप्रभाभिरित्यर्थः। पताकिना पताकायुक्तेन अचिरप्रभारूप-पताका-विशिष्टेनेत्यर्थः। तथा सुरकार्म्मुकं शक्रधनुः, तदेव अभिनवं नूतनं यत् चित्रम् आलेख्यं ; 'चित्रं खे तिलकेऽद्भुते। आलेख्ये कर्व्वुरे चित्रा'त्विति हेमचन्द्रः। तेन शोभिना, यद्वा सुरकार्म्मुकेण अभिनवा चित्रा नानाप्रकारा च या शोभा सा अस्यास्तीति स तथा तेन। तथा विमानतां व्योमयानत्वं गमितेन प्रापितेन नवेन पयोमुचा मेघेन करणेन मां वसतिं नय, मेघं विमानं कृत्वा तदुपरि मां संस्थाप्य च राजधानीं प्रापयेत्यर्थः।

पाविअ-सहअरि-सङ्गओ पुलअ-पसाहिअ-अङ्गओ ।
सेच्छा-पत्त-विमाणओ विहरइ हंस-जुआणओ * ॥ (१)

( इति खण्डधारया निष्क्रान्तौ ) †

( चतुर्थोऽङ्कः समाप्तः )

---

(१) प्राप्त-सहचरी-संङ्गकः पुलकप्रसाधिताङ्गकः ।
स्वेच्छा-प्राप्तविमानको विहरति हंसयुवकः ॥

---

* हंसवर्णनव्यपदेशेनात्मनः सुखावस्थावर्णनमिदम् । स्वेच्छया प्राप्तो विशिष्टो मानःप्रियतमा-सङ्गमादिजन्य चित्तोन्नति र्येन सः ; 'मानश्चित्त-समुन्नति'रित्यमरः । पक्षे स्वाभिलाषोपनीत-व्योमयानः; अपर-विशेषण-द्वयमुभयत्र समानम् ।

† । खण्डधारयेत्यत्र शुद्धयेति भवितु मर्हति, 'चतुर्दश कलायुक्तै श्चतुर्भिं श्चरणैरिहे'ति पूर्व्वोक्तस्य खण्डधारा-लक्षणस्यात्र प्रवेशा-सम्भवात् 'भवेच्चतुर्भि श्चरणै स्त्रयोदश-कलात्मकै' रित्यादिकस्य शुद्धा-लक्षणस्यात्र समावेशात्; अतोऽत्र शुद्धयेति वक्तव्ये खण्डधारयेति यदुक्तं तल्लिपिकर-प्रमाद-विजृम्भित मित्यवगन्तव्यम् ।

# अथ पञ्चमोऽङ्कः ।

—०ऽऽऽ०—

( ततः प्रविशति हृष्टो विदूषकः ) ।

विदू । ही ही भो भो ! दिट्ठिआ चिरस्स कालस्स उव्वसी-सहाओ तत्थभवं राआ णन्दण-वण-प्पमुहेसु पदेसेसु विहरिअ पड़िणिउत्तो णअरं ; दाणिं सकज्जाणुसासणे पइदि-मण्डलं अणुरञ्जअन्तो रज्जं करेदि । आं ! सन्ताणअं वज्जिअ ण से किम्पि सोअणीअं ; अज्ज दिधि-विसेसो त्ति भअवदीणं गङ्गा-जउणाणं सलिलेसु देवीए सह किदाहिसेओ संपदं उअआरिअं पविट्ठो ; ता जाव अलङ्करणीअमाणस्स अङ्गाणुलेअण-मल्लभाई भादुओ होमि * । (१)

---

(१) ही ही (इत्याश्चर्य्ये) भो भो ! दिष्ट्या चिरस्य कालस्य उर्व्वशी-सहाय स्तत्रभवान् राजा नन्दनवन-प्रमुखेषु प्रदेशेषु विहृत्य प्रतिनिवृत्तो नगरम् ; इदानीं स्वकार्य्यानुशासने प्रकृतिमण्डलमनुरञ्जयन् राज्यं करोति ; आं ! सन्तानकं वर्ज्जयित्वा नास्य किमपि शोचनीयम् ; अद्य तिथि-विशेष इति भगवत्यो र्गङ्गा-यमुनयोः सलिलेषु देव्या सह कृताभिषेकः साम्प्रतमुपकारिकां प्रविष्टः ; तद् यावदलङ्क्रियमाणस्याङ्गानुलेपन-माल्यभागी-भ्राता भवामि ।

---

* उपकारिका उपकार्य्या वासगृहमिति यावत् ; 'उपकार्य्योपकारिका' इत्यमरः । 'अङ्गाणुलेअण-मल्लभाई भादुओ' इत्यत्र 'अङ्गाणुलेवणवल्लभाहिं अन्तरे' इति क्वचित् पाठः, अङ्गानुलेपन-वल्लभाभिरन्तरे इति सं ।

(नेपथ्ये) हद्धी हद्धी! एसो जलन्त-रत्त-तालवेन्त-पिधाणं णिक्खिविअ णीअमाणो अच्छरा-विरहिदेण मउलि-रअणदाए पओइदो मणी आमिस-सङ्किणा गिद्धेण आक्खित्तो! * (१)।

विदू। (आकर्ण्य) अच्चाहिदं!, परम-वल्लभदो क्खु सो वअस्सस्स सङ्गमणीओ णाम चूड़ामणी; अदो क्खु असमत्त-णेवच्छो ज्जेव तत्तभवं आसणादो ज्जेव उत्थिदो; ता पासपरि-वत्ती होमि। (२)।

(इति निष्क्रान्तः, प्रवेशकः) †।

(ततः प्रविशति राजा सूतश्च कञ्चुकि-रैवतकौ परिजनश्च)।

राजा। रैवतक! रैवतक!।

---

(१) हाधिक् हाधिक्! एष ज्वलन् रक्ततालवृन्त-पिधानं निक्षिप्य नीयमानोऽप्सरो-विरहितेन मौलिरत्नतायां प्रयोजितो मणि रामिष-शङ्किना गृध्रेणाक्षिप्तः।

(२) अत्याहितम्!, परमवल्लभतः खलु स वयस्यस्य सङ्गमनीयो नाम चूड़ामणिः; अतः खलु असमाप्तनेपथ्य एव तत्रभवान् आसना-देव उत्थितः; तत् पार्श्वपरिवर्त्ती भवामि।

---

* अप्सरो-विरहितेन उर्व्वशी-रहितेन, राज्ञा इति शेषः। आक्षिप्त आकृष्य नीतः। आक्खित्तो इत्यत्र भक्खिदो इति पाठो न मनोरमः, भक्षिते मणौ पश्चादुक्तं किरातवचनं न सङ्गच्छते।

† प्रवेशकस्य लक्षणं यथा; "प्रवेशकोऽनुदात्तोक्त्या नीचपात्रप्रयो-जितः। अङ्कद्वयान्तर्विज्ञेयः शेषं विष्कम्भके यथा" इति।

आत्मनो वध-माहर्त्ता क्वासौ विहग-तस्करः ?।
येन तत्प्रथमं स्तेयं गोप्तुरेव गृहे कृतम् ॥ *

किरातः। एसो अग्गमुह-लग्ग-हेमसुत्तेण † मणिणा अणुरञ्ज-अन्तो विअ आआसं परिब्भमदि। (१)

राजा। पश्याम्येनम्।

असौ मुखालम्बित-हेमसूत्रं बिभ्रन्मणिं मण्डल-शीघ्रचारः।
अलात-चक्र-प्रतिमं विहङ्गस्तद्राग-लेखा-वलयं तनोति ॥ ‡

कथय, किं खल्वत्र कर्त्तव्यम् ?।

विदू। भो! अलं एत्थ घिणाए §; एसो अवराही सासणीओ। (२)

---

(१) एषोऽग्रमुख-लग्न-हेमसूत्रेण मणिना अनुरञ्जयन्निवाकाशं परिभ्रमति।

(२) भोः! अलमत्र घृणया, एषोऽपराधी शासनीयः।

---

* वधमाहर्त्ता वधस्य कर्त्ता; आहर्त्तेति तृजन्तत्वात् तृजिप्रत्ययस्य च त्वादिगणपाठात् तद्योगे वधमित्यत्र न कर्म्मणि षष्ठी। स्तेयं चौर्य्यम्। गोप्तु रक्षकस्य।

† मुखस्याग्रम् अग्रमुखं मुखाग्रम्; 'आहितादि वाऽग्रादे'रित्यनेन मुखस्य परनिपातः।

‡ मण्डलेन मण्डलाकारभ्रमणेन शीघ्रं चारो गतिर्यस्य सः। मण्डलेत्यत्र मण्डितेति पाठे शोभितेत्यर्थः। अलातचक्रप्रतिमं चक्राकारज्वलदङ्गारसदृशम्।

§ घृणया करुणया, 'कारुण्यं करुणा घृणे'त्यमरः।

राजा । सम्यगाह भवान्; धनुर्धनु स्तावत् ।

परिजनः । जं भट्टा आणवेदि । (१)

( इति निष्क्रान्तः ) ।

राजा । न दृश्यते हि विहगाधमः ।

विदू । इदो इदो दक्खिणन्तरेण चलिदो मउणहदासो । * (२)

राजा । ( दृष्ट्वा ) । इदानीम् ।

प्रभापल्लवितेनासौ करोति मणिना खगः ।
अशोकस्तवकेनेव दिङ्मुखस्यावतंसकम् ॥ †

यवनी । ( धनुर्हस्ता प्रविश्य ) भट्टा! एदं ससरं चावं । (३)

राजा । किमिदानीं धनुषा; वाणपथातीतः क्रव्यभोजनः ।

तथाहि;

आभाति मणिविशेषो दूरमिदानीं पतत्त्रिणा नीतः ।
नक्तमिव लोहिताङ्गः परुषघन-च्छेद-संपृक्तः ॥ ‡

---

(१) यत् भर्त्ता आज्ञापयति ।
(२) इत इतो दक्षिणान्तरेण चलितः शकुनहताशः ।
(३) भर्त्तः ! इदं सशरं चापम् ।

---

* शकुनहताशः विहगाधमः गृध्र-इत्यर्थः ।
† प्रभया पल्लवितेन व्याप्तेन । अवतंसकं कर्णभूषणम् ।
‡ लोहिताङ्गो मङ्गलग्रहः ; 'अङ्गारकः कुजो भौमो लोहिताङ्गो महीसुत' इत्यमरः । परुषो गाढ़ो यो घनच्छेदो मेघखण्ड स्तेन संपृक्तः व्यावृतः ।

आर्य्य तालव्य ! *

कञ्चुकी। आज्ञापयतु देवः।

राजा। मद्वचनादुच्यन्तां नागरिकाः; सायं निवासवृक्षाग्रे विचीयतां † विहगाधमः।

कञ्चु। यथाज्ञापयति देवः। ( इति निष्क्रान्तः )।

विदू। भो! विसमीअदु भवं सम्पदं; कहिं गदो मणिकुम्भीलओ भवदो सासणादो मुच्चिस्सदि ? ‡ (१)

( इत्युपविशतः )।

राजा। वयस्य!

रत्नमिति न मे तस्मिन् मणौ प्रयासो विहङ्गमाच्छिन्ने।
प्रियया तेनास्मि सखे! सङ्गमनीयेन संङ्गमितः॥ §

---

(१) भो विश्राम्यतु भवान् साम्प्रतम्; कुत्रगतो मणिकुम्भिलको भवतः शासनान्मोक्ष्यति ?

---

* तालव्य इति कञ्चुकिनो नाम। क्वचित् पुस्तके तालव्येत्यत्र लातव्येति दृश्यते।

† विचीयतां अन्विष्यताम्।

‡ कुम्भिलक चौरः। कहिं गदो इत्यादौ 'कहिंपि गदो मणिकुम्भीलओ भवदो सासणादो ण मुच्चिस्सदी'ति क्वचित् पाठः, कुत्रापि गतो मणिकुम्भिलको भवतः शासनान्न मोक्ष्यतीति सं।

§ रत्नं स्वस्वजात्युत्कृष्टं धनम्; 'जातौ जातौ यदुत्कृष्टं तद्रत्नमिति कथ्यते'इति शास्त्रतः। रत्नमिति कृत्वा विहङ्गमेन आच्छिन्ने अपनीते तस्मिन् मणौ विषये मे मम प्रयासो यत्नो नास्ति इत्यन्वयः। रत्नमितीत्यत्र सारइवेति क्वचित् पाठः; सारशब्दो ऽत्र समस्यन्तः। सारे धन इवेत्यर्थः। सङ्गमनीयेन सङ्गमनीयनामकेन। सङ्गमितः सङ्गं प्रापितः।

कञ्चुकी । (प्रविश्य) जयति जयति देवः ।

अनेन निर्भिन्नतनुः स वध्योरोषेण ते मार्गणतां गतेन ।
प्राप्तापराधोचितमन्तरीक्षात् समौलिरत्नः पतितः पतत्री ॥ *

(सर्व्वे विस्मयं रूपयन्ति) ।

कञ्चु । अभिप्रक्षालितोऽयं मणिः कस्मै प्रदीयताम् ? ।

राजा । रेचक ! † गच्छ ; कोषपेटके स्थापयैनम् ।

किरातः । जं भट्टा आणवेदि । (१)

(इति मणिमादाय निष्क्रान्तः) ।

राजा । (तालव्यं प्रति) आर्य्य ! जानाति भवान् कस्यायं वाण इति ?

कञ्चु । नामाङ्कितो दृश्यते ; नाच मे वर्णविभावनसहा दृष्टिः । ‡

राजा । तदुपश्लेषय § शरं यावन्निरूपयामि ।

---

(१) यद्भर्त्ता आज्ञापयति ।

---

* निर्भिन्नतनु विदारितशरीरः । मार्गणतां गतेन वाणत्वं प्राप्तेन । अन्तरीक्षात् आकाशात् । अपराधस्य उचितं योग्यं शासनमिति शेषः, तत् प्राप्तं यस्मिन् कर्म्मणीति क्रियाविशेषणमिदम् । प्राप्तापराधोचितमित्यत्र प्राप्तापराधः सहसा इति पाठान्तरम् ।

† रेचक इति किरातस्य नाम ।

‡ वर्णविभावनसहा अक्षरनिर्णयक्षमा ।

§ उपश्लेषय समीपमानय ।

विदू। किं भवं विआरेदि ?। (१)

राजा। शृणु तावत् प्रहर्त्तुर्नामाक्षराणि।

विदू। अवहिदो म्हि। (२)

राजा। वाचयति।

उर्व्वशी-सम्भवस्याय-मैलसूनो र्धनुष्मतः। *
कुमारस्यायुषो वाणः संहर्त्ता द्विषदायुषाम्॥

विदू। दिट्ठिआ सन्ताणेण वड्ढदि भवं। (३)

---

(१) किं भवान् विचारयति ?

(२) अवहितोऽस्मि।

(३) दिष्ट्या सन्तानेन वर्द्धते भवान्।

---

* उर्व्वशीसम्भवस्य उर्व्वशीगर्भजातस्य। इलायाः पुत्र ऐलः पुरूरवाः, तस्य सूनुः पुत्रः 'आत्मजस्तनयः सूनुः सुतः पुत्रस्त्रियस्त्वमी' इत्यमरः। इला हि वैवस्वतमनोः कन्या, बुधस्तां भार्य्यात्वेनाङ्गीकृत्य तस्यां पुरूरवसमुत्पादयामास; यदुक्तं श्रीमद्भागवतीये नवमस्कन्धे, 'अप्रजस्य मनोः पूर्व्वं वशिष्ठो भगवान् किल। मित्रावरुणयोरिष्टिं प्रजार्थमकरोद्विभुः। होतुस्तद्व्यभिचारेण कन्येला नाम साभवत्। सा चानुचरसंयुक्ता विचचार वनाद्वनम्। अथ तामाश्रमाभ्यासे चरन्तीं प्रमदोत्तमाम्। स्त्रीभिः परिवृतां वीक्ष्य चकमे भगवान् बुधः। सा पि तं चकमे सुभ्रूः सोमराजसुतं पतिम्। स तस्यां जनयामास पुरूरवसमात्मजम्' इति॥ आयुषः आयुर्नामकस्य। द्विषदायुषां शत्रुजीवितानाम्।

राजा । कथमेतत् ? सखे ! अन्यत्र नैमेषेयसत्रा * दवियुक्तोऽहमुर्व्वश्या ; न कदाचिदपि तत्रभवती गर्भाविर्भूत-दोहदा † प्युपलक्षिता ; कुतएव प्रसूतिः ? किन्तु,

आनील-चूचुकाग्रं लवलीफल-पाण्डुराननच्छायम् ।
कतिचिदहानि शरीरं श्लथवलयमिवाभवत्तस्याः ॥ ‡

विदू । मा भवं माणुसीधम्मं उव्वसीए सम्भावेदु ; पभावगूढ़ाइं देवचरिदाइं । (१)

---

(१) मा भवान् मानुषीधर्म्ममुर्व्वश्याः सम्भावयतु । प्रभावगूढ़ानि देवचरितानि ।

---

* निमेषोऽक्षिनिमीलनं नेत्रपक्ष्मणां पातइत्यर्थः, तेन जातं नैमेषेयं यत् सत्रमाच्छादनं तस्मादन्यत्र अहमुर्व्वश्या अवियुक्तः निमेषपातसमयादन्यत्र न कदाचिदहमुर्व्वश्या वियुक्तइत्यर्थः, 'निमेषनिमिषौ कालप्रभेदेऽक्षिनिमीलने' इति, 'सत्रं यज्ञे सदादानाच्छादनारण्यकैतवे' इति च मेदिनी । नैमेषेयसत्रादित्यत्र 'अनिमिषीयक्रतुदर्शना'दिति पाठे; अविद्यमानो निमिषोनिमेषो येषां ते अनिमिषा देवाः ; 'ऽनिमेषो देव मत्स्ययो'रिति मेदिनी । तेषां क्रतुदर्शनादन्यत्र देवयज्ञदर्शनकालादन्यत्रेत्यर्थः ।

† गर्भेण आविर्भूत उत्पन्नो दोहदो द्रव्यविशेषभक्षणादिलालसा यस्याः सा ।

‡ आ ईषन्नीलं चूचुकयो स्तनाग्रयो रग्रम् अग्रभागो यस्मिन् तत् । 'चूचुकन्तु कुचाग्रं स्या'दित्यमरः । तथा लवलीफलं नोयाड़ इति भाषया प्रसिद्धं, तद्वत् पाण्डुरा आननस्य मुखस्य च्छाया कान्ति र्यस्मिन् तत् ; 'छाया सूर्य्यप्रिया कान्ति'रित्यमरः ।

राजा। अस्तु तावदेवं; यथाह भवान्। पुत्त्रसंवरणे* किमिव कारणं तस्याः?

विदू। मा वुड्ढिं मं राआ परिहरिस्सदित्ति। (१)

राजा। कृतं परिहासेन; चिन्त्यताम्।

विदू। को देव्व-रहस्साइं चिन्तिस्सदि?

कञ्चुकी। (प्रविश्य) जयति जयति देवः, एषा खलु च्यवनाश्रमाद्भार्गवी कुमारमादायायाता तापसी देवं द्रष्टुमिच्छति।

राजा। उभयमप्यविलम्बं प्रवेशय।

कञ्चुकी। तथा (इति निर्गम्य तापसीसहितं कुमारमादाय प्रविष्टः)।

विदू। णं क्खु एसो खत्तिअ-कुमारो; जस्स णामङ्किदो गिद्ध-लक्खवेही णाराओ उअलद्धो। तधा हि भवदो बहु अणुकरेदि। (२)

राजा। एवमेतत्।

वाष्पायते निपतिता मम दृष्टिरस्मिन्,
वात्सल्यबन्धि हृदयं, मनसः प्रसादः।

---

(१) मा वृद्धां मां राजा परिहरिष्यतीति।

(२) ननु खल्वेष क्षत्त्रियकुमारः; यस्य नामाङ्कितो गृध्रलक्ष्यवेधी नाराच उपलब्धः; तथाहि भवतो बह्वनुकरोति।

---

* पुत्त्रसंवरणे पुत्त्रगोपने।

सञ्जात-वेपथुभि-रुज्झित-धैर्य्यवृत्त-
मिच्छामि चैन-मदयं परिरब्धुमङ्गैः ॥ *

कञ्चुकी । एवं स्थीयताम् । (तापसीकुमारौ यथोचितं स्थितौ) ।

राजा । ( उपसृत्य ) भगवति ! अभिवादये ।

ताप । महाराअ ! सोमवंसं धारअन्तो होहि । ( आत्मगतम् ) भो ! इमिणा † अकधिदोवि विण्णादोज्जेव इमस्स राएसिणो अत्तणो ओरसो सम्बन्धो ! ( प्रकाशम् ) । जाद ! पणम गुरुं । ( १ )

( कुमारो वाष्पगर्भ-मञ्जलिं वद्धा प्रणमति ) ।

राजा । वत्स ! आयुष्मान् भव ।

कुमा । ( स्पर्शं रूपयित्वा स्वगतम् ) ।

---

( १ ) महाराज ! सोमवंशं धारयन् भव । भो ! अनेन अकथितोऽपि विज्ञात एवास्य राजर्षेरात्मन औरसः सम्बन्धः । जात ! प्रणम गुरुम् ।

---

* वाष्पायते वाष्पमुद्गमति अश्रुपरिपूर्णा भवतीत्यर्थः हर्षोदयादिति भावः । "वाष्पादेरुद्गमने" इति सूत्रेणायप्रत्ययः । वात्सल्यवन्धि स्नेहरसाभिषिक्तं । सञ्जातवेपथुभिः सञ्जातकम्पैरङ्गैः करणैः उज्झितधैर्य्यवृत्तं परित्यक्तस्थैर्य्यगुणम्, अदयं निर्द्दयं गाढमिति यावत् यथा तथा, उभयमपि क्रियाविशेषणम् । एनं कुमारं परिरब्धुम् आलिङ्गितुमिच्छामि ।

चतुर्थपादे 'इच्छामिं दीर्घमदयं परिरम्भमङ्गै'रिति पाठान्तरं, दीर्घं दीर्घकालव्यापकम् । *

यदि हार्दमिदं श्रुत्वा पिता ममायं, सुतोऽहमस्येति।
उत्सङ्गे वृद्धानां गुरुषु भवेत् कीदृशः स्नेहः॥ *

राजा। भगवति! कि-मागमन-प्रयोजनम्?

ताप। सुणादु महाराओ; एसो दीहाऊ उव्वसीए जादमेत्तो ज्जेव किम्पि णिमित्तं पेक्खिअ मम हत्थे णासीकिदो; जधा खत्तिअस्स कुलीणअस्स जादकम्मादिविधाणं, तं से तत्थभवदा चवणेण सव्वं अणुट्ठिदं; दाणिं गहिद-विज्जो धणुव्वेए अ विणीदो। (१)

राजा। सनाथः खलु संवृत्तः।

ताप। अज्ज पुप्फ-फल-समित्-कुस-णिमित्तं इसिकुमारएहिं सह गदेण इमिणा अस्समवास-विरुद्धं † समाअरिदं। (२)

---

(१) शृणोतु महाराजः एष दीर्घायु रुर्वश्या जातमात्र एव, किमपि निमित्तं प्रेक्ष्य, मम हस्ते न्यासीकृतः; यथा क्षत्रियस्य कुलीनकस्य जातकर्मादिविधानं, तदस्य तत्रभवता च्यवनेन सर्व्वमनुष्ठितम्। इदानीं गृहीतविद्यो धनुर्व्वेदे च विनीतः।

(२) अद्य पुष्प-फल-समित्-कुश-निमित्तम् ऋषिकुमारकैः सह गतेनानेन आश्रमवासविरुद्धं समाचरितम्।

---

* अयं मम पिता, अहमस्य सुत इति श्रुत्वा यदि इदम् एतादृशम् अनिर्व्वचनीयमित्यर्थः हार्दं प्रेम स्यात् तदा उत्सङ्गे पित्रोः क्रोड़े वृद्धानां वर्द्धिं प्राप्तानां बालानामिति शेषः गुरुषु पितृमातृषु विषये कीदृशः स्नेहो भवेत्, तं वक्तुं न शक्नोमीत्यर्थः।

† आश्रमवासस्य विरुद्धं प्राणिहिंसारूपम्।

विदू । कधं विश्र ? (१)

ताप । गहिदामिसो किल गिद्धो अस्सम-पादवसिहरे णिलीअमाणो लक्खीकिदो वाणस्स । (२)

राजा । तत स्ततः ? ।

ताप । तदो उअलद्ध-वुत्तन्तेण भअवदा अहं समादिट्ठा; णिय्यादेहि एदं उव्वसीहत्थे णासं त्ति; ता इच्छामि उव्वसीं पेक्खिदुं * । (३)

राजा । आसनमनुगृह्णातु भवती ।

( प्रेष्योपनीतयो-रासनयो-रुपविष्टौ ) ।

आर्य्य तालव्य ! उर्व्वशी उच्यताम् ।

कञ्चु । तथा । ( इति निष्क्रान्तः ) ।

राजा । एह्येहि वत्स !

---

(१) कथमिव ? ।

(२) गृहीतामिषः किल गृध्र आश्रम-पादपशिखरे निलीयमानो लक्षीकृतो वाणस्य ।

(३) तत उपलब्ध-वृत्तान्तेन भगवता अहं समादिष्टा, निर्य्यादयैत-मुर्व्वशीहस्ते न्यासमिति ; तदिच्छामि उर्व्वशीं प्रेक्षितुम् ।

---

* न्यासं निक्षेपम् ; निक्षेपो नाम रक्षणार्थमपरस्य हस्ते निहितं द्रव्यम् ; यदाह नारदः । 'स्वं द्रव्यं यत्र विश्रम्भा न्निक्षिपत्यविशङ्कितः । निक्षेपो नाम तत् प्रोक्तं व्यवहारपदं बुधै'रिति ।

सर्व्वाङ्गीनः स्पर्शः सुतस्य किल; तेन मामुपनतेन।
प्रह्लादयस्व तावच्चन्द्रकर श्चन्द्रकान्तमिव॥ *

तापः। जाद! णन्देहि पिदरं। (१)

(कुमारो राजानमुपसर्पति)।

राजा। (आलिङ्ग्य)। वत्स! प्रियसखं ब्राह्मण-मविशङ्कितो वन्दस्व।

विदू। किंत्ति मे सङ्कदि? अस्सम-वास-परिचिदा एदस्स साहामिआ। † (२)

कुमा। (सस्मितम्) तात! वन्दे।

विदू। सोत्थि भोदु दे, वड्ढदु भवं। (३)

(ततः प्रविशति उर्व्वशी कञ्चुकीच)।

कञ्चु। इत इतो भवती!

---

(१) जात! नन्दय पितरम्।

(२) किमिति मां शङ्कते? आश्रम-वास-परिचिता एतस्य शाखामृगाः।

(३) स्वस्ति भवतु ते, वर्द्धतां भवान्।

---

* सुतस्य स्पर्शः सर्व्वाङ्गीनः किल सर्व्वाङ्गव्यापक एव सर्व्वशरीरावच्छेदेनानन्दजनक एवेत्यर्थः। उपनतेन उपस्थितेन तेन स्पर्शेन मामाह्लादयस्व, गाढ़-मालिङ्ग्य मा मानन्दय इत्यर्थः। उपनतेनेत्यत्र उपगतेनेति क्वचित् पाठः।

† शाखामृगा वानराः; 'शाखामृग वलीमुखाः। मर्कटो वानरः कीश' इत्यमरः। परिचित-वानरोऽयं बालको वार्द्धक्येन वानरसदृशाकारं मां पश्यन् न भयं प्राप्स्यतीति भावः। 'अस्समवास-परिचिदा' इत्यत्र 'अस्समं परिदो परिचिदा' इति पाठान्तरम्। आश्रमं परितः परिचिता इति सं।

उर्व्वशी । (प्रविश्यावलोक्य च) । को ण क्खु एसो कणअ-वीठोवविठ्ठो, महाराएण संजमीअमाण-सिहण्डओ * चिठ्ठदि ? (तापसीं दृष्ट्वा) । अम्हहे ! सच्चवदी-सहिदो पुत्तओ मे आऊ !; महन्तो क्खु संवुत्तो । (१)

राजा । (विलोक्य) वत्स !

इयं ते जननी प्राप्ता, त्वदालोकन-तत्परा ।
स्नेह-प्रस्नव-निर्भिन्न-मुद्दहन्ती स्तनांशुकम् । †

ताप । जाद ! एहि पचुवगच्छ मादरं । (२)

---

(१) कोनु खल्वेष कनकपीठोपविष्टो महाराजेन संयम्यमान-शिखण्डक स्तिष्ठति ? । अहो ! सत्यवती-सहितः पुत्रको मे आयुः ! । महान् खलु संवृत्तः ।

(२) जात ! एहि प्रत्युपगच्छ मातरम् ।

---

* शिखण्ड-चूड़ा ; 'शिखण्डो बर्हं चूड़यो'रिति मेदिनी । संजमीअमाण इत्यत्र सञ्जीअमाण इति क्वचित् पाठः, सज्ज्यमान इति सं, सुश्रूयमान इत्यर्थः ।

† त्वदालोकन-तत्परा तव दर्शने समासक्ता : 'तत्परे प्रसितासक्ता'-वित्यमरः । स्नेहेन पुत्रप्रेम्णा यः प्रस्नवः क्षीराभिष्यन्दनं तेन नितरां भिन्नं सक्लृतम् आर्द्रतया स्तनोपरि संश्लिष्टमित्यर्थः 'भिन्नः स्या त्त्रिषु दारिते । सक्लृतेऽन्यत्र फुल्लेचे 'ति मेदिनी । स्तनांशुकं स्तनोपरिस्थितं वस्त्रम्, उद्वहन्ती धारयन्ती । स्तनांशुकमित्यत्र स्तनद्वयमिति पाठे स्नेहस्य प्रस्नवः क्षरणं सञ्चार इत्यर्थः तेन निर्भिन्नं विदारितं क्षरितदुग्धमित्यर्थः ।

( इति कुमारेण सह उर्व्वशीमुपसर्पति )।

उर्व्व। अज्जे! पादवन्दणं करेमि। (१)

ताप। वच्छे! भत्तुणो बहुमदा होहि। (२)

कुमा। आर्य्ये! अभिवादये।

उर्व्व। वच्छ! पिदरं आराधअन्तो होहि। (३)

( राजानं प्रति )। जअदु जअदु महाराओ। (४)

राजा। स्वागतं पुत्रवत्यै; इत आस्यताम्।

उर्व्व। अज्जा! उअविसध। (५)

( सर्व्वे तथेत्युपविष्टाः )।

ताप। वच्छे! गहिदविज्जो संपदं आउध-कवअहरो संवुत्तो एसो, भत्तुणो दे समक्खं निप्पादिदो मए तुह हत्थे निक्खेवो; ता विसज्जिदं अत्तांणं इच्छामि; उअरुज्झदि मे अस्सम-वास-धम्मो। * (६)

---

(१) आर्य्ये! पादवन्दनं करोमि।
(२) वत्से! भर्त्तुर्बहुमता भव।
(३) वत्स! पितरमाराधयन् भव।
(४) जयतु जयतु महाराजः।
(५) आर्य्या! उपविशत।
(६) वत्से! गृहीतविद्यः साम्प्रतम् आयुधकवचधरः संवृत्त एषः, भर्त्तुस्ते समक्षं निष्पादितो मया तव हस्ते निक्षेपः; तद्विसर्जित-मात्मान-मिच्छामि; उपरुध्यते मे आश्रमवासधर्म्मः।

---

* आत्मानं विसर्ज्जितं परित्यक्तं त्वयेति शेषः, इच्छामि, त्वमनुजानीहि अहं गच्छामीत्यर्थः।

उर्व्व। कामं चिरस्स पेक्खिअ विरहुक्कण्ठिदम्हि; ण उण धम्मावरोहे वट्टिदुं, गच्छदु अज्जा पुणोवि दंसणस्स (१)

राजा। आर्य्ये! तत्रभवते च्यवनाय मम प्रणाममावेदयिष्यसि।

ताप। एव्वं भोदु।

कुमा। आर्य्ये! सत्यमेव निवर्त्तनं? इतोमामपि नेतु मर्हसि।

राजा। चरितं त्वया पूर्व्वस्मिन्नाश्रमपदे, द्वितीयमध्यासितुं समयः। *

ताप। जाद! गुरुणो वअणं अणुचिट्ठ। (२)

कुमा। तेनहि।

यः सुप्तवान् मदङ्के शिखण्ड-कण्डूयनोपलब्ध-सुखः।
तं मे जातकलापं प्रेषय शितिकण्ठकं शिखिनम्॥ †

ताप। एव्वं करेमि।

उर्व्व। भअवदि! पादवन्दणं करेमि। (३)

---

(१) कामं चिरस्य प्रेक्ष्य विरहोत्कण्ठितास्मि; न पुनर्धर्म्मावरोधे वर्त्तितुं, गच्छतु आर्य्या पुनरपि दर्शनाय।

(२) जात! गुरो वंचनमनुतिष्ठ।

(३) भगवति! पादवन्दनं करोमि।

---

* त्वया पूर्व्वस्मिन्नाश्रमे ब्रह्मचर्य्याश्रमे, चरितं स्थितं भावे क्तः, पूर्व्वाश्रमोपयुक्तं कर्म्म वेदाध्ययनादिकं कृतमिति वा। द्वितीयं गार्हस्थाश्रमम् अध्यासितुम् आश्रयितुम्।

† शिति नीलः कण्ठो यस्य तम्; 'शिति भूर्ज्जे। ना सितासितयो स्त्रिषि'ति मेदिनी।

राजा। भवति! प्रणमामि।

ताप। सोत्थि सव्वाणं। (१)

( इति निष्क्रान्ताः ) ॥

राजा। सुन्दरि!

अद्याहं पुत्रिणामग्रः सुपुत्रेण तवामुना।
पौलोमीसम्भवेनेव जयन्तेन पुरन्दरः ॥ *

( उर्व्वशी स्मृत्वा रोदिति )

विदू। भो! किंणु क्खु सम्पदं तत्थभोदी अस्सुमुही संवुत्ता? । (२)

राजा। किं सुन्दरि! प्ररुदितासि ममोपनीते
वंशस्थितेरधिगमात् स्फुरति प्रमोदे।
पीनस्तनोपरि निपातिभि रर्पयन्ती
मुक्तावली-विरचनं पुनरुक्तमस्रैः? ॥ †

---

(१) स्वस्ति सर्व्वेषाम्।
(२) भोः! किं नु खलु साम्प्रतं तत्रभवती अश्रुमुखी संवृत्ता?।

---

* अग्र्यः अग्रगण्यः श्रेष्ठ इत्यर्थः। पुलोमा असुरविशेष इति भरतः; तस्यापत्यं स्त्री पौलोमी इन्द्राणी, तत् सम्भवेन तद्गर्भोत्पन्नेन जयन्तेन तदाख्य-पुत्रेण।

† मम वंशस्य स्थिति रवस्थानं यस्मात तस्य वंशरक्षकस्येत्यर्थः पुत्रस्य अधिगमात् लाभाद्धेतोः उपनीते उपस्थिते प्रमोदे स्फुरति प्रकाशमाने सति पुत्रप्राप्तिजन्यानन्दानुभवसमये उपस्थिते सतीत्यर्थः हे सुन्दरि! त्वं पीनस्तनयोरुपरि निपातिभिः पतद्भिः अस्रै रश्रु-

उर्व्व । सुणादु महाराओ ; पढुमं पुत्त-दंसन-समुत्थिदेण आणन्देण विसुमरिदम्हि ; दाणिं महेन्द-संकित्तणेण स अवधी मम हिअएण सुमरिदो * । (१)

राजा । कथ्यताम् ।

उर्व्व । सुणादु महाराओ ; पुरा महाराअ-गहिद-हिअआ गुरुसाव-संमूढ़ा, महेन्देण अवधिं कदुअ, अब्भणुणादा । (२)

राजा । कथय ; किमिति ? ।

उर्व्व । जदो सो मम पिअसहो राएसी तइ समुप्पणस्स पुत्तअस्स मुहं पेक्खदि, तदो मम समीवं तए आअन्तव्वं त्ति ।

---

(१) शृणोतु महाराजः ; प्रथमं पुत्रदर्शनसमुत्थितेनानन्देन विस्मृतास्मि ; इदानीं महेन्द्रसंकीर्त्तनेन सोऽवधि र्मम हृदयेन स्मृतः ।

(२) शृणोतु महाराजः ; पुरा महाराजगृहीतहृदया गुरुशापसंमूढ़ा महेन्द्रेणावधिं कृत्वाभ्यनुज्ञाता ।

---

बिन्दुभिः मुक्तासदृशैरिति भावः, मुक्तावलीविरचनं पुनरुक्तं पुनरुक्ताख्य-दोषदूषितम् अधिकतया निष्फलमित्यर्थः अर्पयन्ती कुर्व्वती सती किं किमर्थं प्ररुदितासि क्रन्दितासि इत्यन्वयः । मुक्तावली-विरचनामिति पाठे पुनरुक्तपदं क्रियाविशेषणम् । केचित्, स्फुरति प्रमोदे उपनीते प्राप्ते सतीत्यन्वयं चक्षुः, तन्न मनोरमम्, शत्रन्तस्य स्फुरतीति पदस्यैव विधेयत्वेन निर्द्देष्टु-मुचितत्वात् । स्फुरतीत्यत्र महतीति पाठेतु उपनीते इत्यस्यैव विधेयत्वम् ।

* महेन्द्रसंकीर्त्तनेन इन्द्रपर्य्यायोक्त-पुरन्दरशब्दोच्चारणेन । अवधिः समयः, कालसीमा वा ; 'अवधि स्त्ववसाने स्यात् सीम्नि काले बिले पुमा'निति मेदिनी । विसुमरिदम्हि इत्यत्र आणन्दिदम्हि इति पाठान्तरम्, आनन्दितास्मि इति सं । आनन्दितास्मि आनन्देन मोहितास्मीत्यर्थः ।

तदो मए महाराअ-विओअ-भीरुदाए चिरआल-सङ्कम-णिमित्तं* भअवदो चवणस्स अस्समपदे पुत्तओ अज्जाए सच्चवदीए हत्थे अप्पणा णिक्खित्तो ; अज्ज उण पिदुणो आराहण-समत्थो संवुत्तो त्ति काउण णिय्यादिदो एसो दीहाऊ । एत्तिको मे महाराएण सह संवासो । ( १ )

( सर्व्वे विषादं नाटयन्ति । राजा मोहमुपगच्छति )

सर्व्वे । आः ! समस्ससदु समस्ससदु महाराओ । ( २ )

कञ्चु । समाश्वसितु महाराजः ।

विदू । अव्वम्हणं अव्वम्हणं † । ( ३ )

---

(१) यदा स मम प्रियसखो राजर्षिं स्वयि समुत्पन्नस्य पुत्रकस्य मुखं प्रेक्षते, तदा मम समीपं त्वया आगन्तव्यमिति । ततो मया महाराज-वियोग-भीरुतया चिरकाल-सङ्गम-निमित्तं भगवतश्च्यवनस्याश्रमपदे पुत्रक आर्य्यायाः सत्यवत्या हस्ते आत्मना निक्षिप्तः ; अद्य पुनः पितु-राराधन-समर्थः संवृत्त इति कृत्वा निर्य्यादित एष दीर्घायुः । एतावानेव मे महाराजेन सह संवासः ।

(२) समाश्वसितु समाश्वसितु महाराजः ।

(३) अब्रह्मण्यं अब्रह्मण्यम् ।

---

* 'चिरआल-सङ्कमणिमित्त'मित्यत्र 'जादमेत्त ज्जेव विज्जागम-णिमित्त'मिति पाठान्तरम् ; जातमात्र एव विद्यागमनिमित्तमिति सं ।

† अब्रह्मण्यम् अवध्योक्तिः ; 'अब्रह्मण्यमवध्योक्ति'मित्यमरः ।

राजा । (समाश्वस्य) अहो ! सुखप्रतिबन्धिता दैवस्य ।

आश्वासितस्य मम नाम सुतोपलब्ध्या
सद्यस्त्वया सह कृशोदरि ! विप्रयोगः ।
व्यावर्त्तितातपरुजः प्रथमाभ्रवृष्ट्या
वृक्षस्य वैद्युत इवाग्निरुपस्थितोऽयम् ॥

विदू । अअं सो अत्थो अणत्थाणुबन्धओ त्ति तक्केमि अत्थभवं देवराओ सअं अणुग्गाहइदव्वो * । (१)

उर्व्व । हा ! हदम्हि मन्दभाइणी ; किद-विणअस्स तणअस्स लम्भाणन्तरं सग्गारोहणेण अवसिद-कज्जां विप्पओअ-मुहीं मं महाराओ समत्थइस्सदि (२)

राजा । सुन्दरि ! मा भैवम् ।

न हि सुलभ-वियोगा कर्त्तुमात्मप्रियाणि
प्रभवति परवत्ता ; शासने तिष्ठ भर्त्तुः ।

---

(१) अयं सोऽर्थोऽनर्थानुबन्धक इति तर्कयामि अत्रभवान् देवराजः स्वयमनुग्राहयितव्यः ।

(२) हा हतास्मि मन्दभागिनी, कृतविनयस्य तनयस्य लम्भानन्तरं स्वर्गारोहणेनावसितकार्य्यां विप्रयोगमुखीं मां महाराजः समर्थयिष्यति ।

---

* स पुत्रप्राप्तिरूपोऽर्थो वस्तु निमित्तं वा अनर्थस्य उर्व्वशीवियोगरूपस्य अनिष्टस्यानुबन्धकः सम्पादकः । 'अणत्थाणुबन्धओ' इत्यत्र 'अस्सत्थाणुबन्धओ' इति क्वचित् पाठः, अन्यार्थानुबन्धक इति सं । 'अत्थभवं देवराओ सअं अणुग्गाहइदव्वो' इत्यत्र 'अत्थभवदा वक्कलं गेह्णिअ तवोवणं गन्तव्वं' इति पाठान्तरम्, अत्रभवता वल्कलं गृहीत्वा तपोवनं गन्तव्यमिति सं ।

अहमपि तव सूनावद्य विन्यस्य राज्यं<br>
विचरित-मृगयूथान्याश्रयिष्ये वनानि ॥ *

कुमारः । नार्हति तातो महोच्च-धारितायां धुरि दम्यं † नियोजयितुम् ।

राजा । अयि वत्स ! मा मैवम् ।

ग्रसयति गजानन्यान् गन्धद्विपः कलभोऽपि सन् ;<br>
प्रभवतितरां वेगोदग्रं भुजङ्गशिशो-र्विषम् ।<br>
भुव-मधिपति-र्बालावस्थोऽप्यलं परिरक्षितुम् ;<br>
न खलु वयसा, जात्यैवायं स्वकार्य्य-सहो गुणः ॥ ‡

आर्य्य तालव्य !

कञ्चु । आज्ञापयतु देवः ।

राजा । मद्वचनादमात्यपर्व्वतं ब्रूहि, सम्भ्रियता§ मायुष्मतो राज्याभिषेकः ।

---

* सुलभः सुप्रापो वियोगो यस्यां तादृशी परवत्ता पराधीनता ।

† दम्यं दमनीयम्, अनभ्यस्त-भारवहन-व्यापारमिति यावत् ।

‡ ग्रसयति पराभवति । गन्धद्विपः गन्धप्रधानो द्विपः ; तल्लक्षणं यथा, 'यस्य गन्धं समाघ्राय पलायन्तेऽपरे गजाः । स वै गन्धगजो नाम नृपते विजयावहः' इति । 'कलभः शावकः, 'कलभः करिशावक' इत्यमरः । वेगेन उदग्रम् उग्रम् । वयसा तारुण्यादिना । जात्या गन्धद्विपत्व-भुजङ्गत्व-क्षत्रियत्वादिरूपया । स्वकार्य्यसहः वैरिविजयादि-निजकार्य्य-निर्वाहक्षमः । गुणः शौर्य्योत्साहादिकः ।

§ संभ्रियतां सज्जीयताम् ।

( कञ्चुकी दुःखेन निष्क्रान्तः । सर्व्वे दृष्टिविघातं रूपयन्ति )

राजा । (आकाशमवलोक्य) कुतो नु खलु भो विद्युत्सम्पातः ! ।

( निपुणमवलोक्य )

अये ! भगवान् नारदः !

गोरोचना-निकष-पिङ्ग-जटाकलापः
संलक्ष्यते शशिकलामल-वीतसूत्रः ।
मुक्तागुणातिशय-संभृत-मण्डनश्री
र्हैम-प्ररोह इव जङ्गम-कल्पवृक्षः ॥ *

अर्घोऽर्घस्तावत् ।

उर्व्व । इदं भअवदो अग्घं ( १ )

नारदः । (प्रविश्य) । विजयतां विजयतां मध्यमलोकपालः ।

राजा । भगवन् ! अभिवादये ।

उर्व्व । पणमामि । ( २ )

---

(१) इदं भगवतो ऽर्घ्यम् ।

(२) प्रणमामि ।

---

* गोरोचनाया निकषाः कषणपाषाणाः, तद्गणया निकषोपरि-स्थित-गोरोचना-लेखाः इत्यर्थः, तद्वत् पिङ्गः पिङ्गलवर्णो जटाकलापो यस्य सः । तथा शशिकलावत् अमलं निर्म्मलं वीतसूत्रं यज्ञसूत्रं यस्य सः । मुक्तागुणै मुंक्ताहारै रतिशयं यथातथा सम्भृता वर्द्धिता मण्डनश्री र्भूषणशोभा यस्य सः । तथा हैमाः हेममयाः प्ररोहाः शाखामूलादधो लम्बमाना निजजटा यस्य तादृशः । मुक्तागुणानां धावल्यात् यज्ञसूत्र-साम्यं, हैमप्ररोहाणाञ्च पिङ्गलतया जटासाम्यम् । तृतीयचरणे, 'मुक्ता-फलातिशय-सम्भृत-यौवनश्री'रिति पाठान्तरम् ।

नारदः। अविरहितौ दम्पती भूयास्ताम्।

राजा। (जनान्तिकम्) अपि नामैवं स्यात्? (प्रकाशम्)। और्व्वशेयः पुत्रो वः प्रणमति।

नारदः। आयुष्मानास्तामयम्।

राजा। अयं विष्टरो * गृह्यताम्।

(सर्व्वे उपविशन्ति)

राजा। (सविनयम्) भगवन्! किमागमन-प्रयोजनम्?

नारदः। राजन्! श्रूयतां महेन्द्रसन्देशः।

राजा। अवहितोऽस्मि।

नारदः। प्रभावदर्शी मघवा वनगमनाय कृतबुद्धिं भवन्त-मनुशास्ति।

राजा। किमाज्ञापयति?

नारदः। त्रिकालदर्शिभि रादिष्टः, सुरासुर-विमर्द्दो भावी; भवांश्च सांयुगीनः सहायः; तेन न त्वया शस्त्रन्यासः कर्त्तव्यः; इयञ्च उर्व्वशी यावदायुस्ते धर्मचारिणी भवतु इति। †

---

* विष्टर आसनम्; 'विष्टरः कुशमुष्टौ स्या दासनेऽपि महीरुहे' इति मेदिनी।

† त्रिकालदर्शिभिः अतीतानागत-वर्त्तमानरूप-कालत्रयदर्शिभिः ज्यौतिषिकैरित्यर्थः। क्वचित् 'त्रैलोक्यदर्शिभि'रिति पाठः। सुरासुर-विमर्द्दो देवदानव-संग्रामः। संयुगे रणे साधुः सांयुगीनः; 'सांयुगीनो रणे साधु'रित्यमरः। शस्त्रन्यासः शस्त्रपरित्यागः।

उर्व्व । अम्हहे ! सल्लं विअ हिअआदो अवणीदं ! । (१)

राजा । परमनुगृहीतोऽस्मि परमेश्वरेण ।

नारदः । युक्तम् ।

तव कार्य्यमसौ कुर्य्यात्, त्वञ्च तस्येष्टकार्य्यकृत् ।
सूर्य्यः संवर्द्धयत्यग्नि, मग्निः सूर्य्यं स्वतेजसा ॥ *

(आकाशमवलोक्य) रम्भे ! उपनीयतां मन्त्रेण सम्भृतः कुमारस्याभिषेकः । †

रम्भा । (प्रविश्य) अअं से अहिसेअ-सम्भारो । (२)

नारदः । उपवेश्यता-मय-मायुष्मान् भद्रपीठे ।

(रम्भा कुमारं भद्रपीठे उपवेशयति)

नारदः । (कुमारस्य शिरसि कलसमावर्ज्य) । रम्भे ! निर्व्वर्त्त्यतामस्य शेषो विधिः । ‡

---

(१) आश्चर्य्यं, शल्यमिव हृदयादपनीतम् ! ।

(२) अयमस्याभिषेक-सम्भारः ।

---

* सूर्य्यः स्वतेजसा अग्निं संवर्द्धयति रात्राविति शेषः; अग्निरपि सूर्य्यं, दिवसे इति शेषः; 'सौरं तेजः सायमग्निं संक्रमते। आदित्यो वा अस्तं यन्नग्निमनुप्रविशति' इत्यादिः श्रुतिरेवात्र प्रमाणम् ।

† मन्त्रेण मन्त्रबलेन संभृतः संगृहीतः अभिषेक अभिषेकसाधनं तीर्थजलादिकम् उपनीयतामित्यन्वयः ।

‡ अस्य अभिषेकस्य शेषो विधिः शेषोक्त-विधानम् अनन्तर-करणीयमिति यावत् ।

रम्भा। (यथोक्तं निर्व्वर्त्त्य) वच्छ! पणम भअवदं पिदरो अ। (१)

(कुमारः सर्व्वान् प्रणमति)

नारदः। स्वस्ति भवते।

राजा। वंशवर्द्धनो भव।

उर्व्वशी। पिदुणो दे वअणाणि होन्तु। (२)

(नेपथ्ये वैतालिकद्वयम्)

प्रथमः। विजयतां विजयतां युवराजः।
अमरमुनि रिवात्त्रिः स्रष्टु, रत्रेरिवेन्दु-,
र्बुध इव शिशिरांशो, र्बुधस्येव देवः।
तव पितुरनुरूप स्त्वं गुणै र्लोककान्ते-
रतिशयिनि समाप्ता वंश एवाशिषस्ते॥ *

---

(१) वत्स! प्रणम भगवन्तं पितरौ च।
(२) पितु स्ते वचनानि भवन्तु।

---

* अमरमुनि र्देवर्षिः। विधोरपत्यं पुमान् बौधः तस्य चन्द्र-पुत्रस्य बुधस्य। देवो राजा; 'राजा भट्टारको देव' इत्यमरः। अतिशयिनि वंशान्तरमतिशयाने सर्व्वोत्कर्षशालिनीत्यर्थः ते तव वंशे एव आशिषः समाप्ताः पर्य्याप्ताः सन्तीति शेषः। समाप्ता इत्यत्र समस्ता इति पाठान्तरम्।

द्वितीयः । तव पितरि पुरस्तादुन्नभावा स्थितेयं
स्थितिमति च विभक्ता त्वय्यनाकल्पधैर्य्ये ।
अधिकतरमिदानीं राजते राजलक्ष्मी-
र्हिमवति जलधौ च प्राप्ततोयेव गङ्गा ॥ *

रम्भा । दिट्ठिआ सही पुत्तअस्स जुअराअ-सिरीं पेक्खिअ भत्तुणो
विरहे ण वट्टदि । (१)

उर्व्व । साहारणो ज्जेव णो अब्भुदओ ।

(कुमारं हस्ते गृहीत्वा)

जाद ! जेट्ठमादरं वन्देहि । (२)

राजा । तिष्ठ ; सममेव तत्रभवत्याः समीपं यास्यामस्तावत् ।

नारदः । आयुषो यौवराज्यश्रीः स्मारयत्यात्मजस्य ते ।
अभियुक्तं महासेनं सैनापत्ये मरुत्वता ॥ †

---

(१) दिष्ट्या सखी पुत्रकस्य युवराजश्रियं प्रेक्ष्य भर्त्तु विरहे न वर्त्तते
(२) साधारण एव नोऽभ्युदयः । जात ! ज्येष्ठमातरं वन्दस्व ।

---

* इयं राजलक्ष्मी पुरस्तात् पूर्व्वं तव पितरि बद्धभावा जातानुरागा सती स्थिता ; इदानीं सम्प्रति, त्वयि युवराजे सतीत्यर्थः, स्थितिर्मर्य्यादायुक्ते, तथा अनाकल्प्यं कल्पनाशक्त्या परिमातुमशक्यं धैर्य्यं यस्य सः अपरिमित-धैर्य्य-शालीत्यर्थः, तादृशे ; अनाकम्पधैर्य्ये इति पाठे केनाप्यविचलितधैर्य्ये इत्यर्थः, त्वयि च विभक्ता एकैकांशेन उभयत्र वर्त्तमाना सती, हिमवति हिमालये जलधौ समुद्रे च प्राप्ततोया गङ्गेव अधिकतरं राजते शोभते । प्रथमप्रतीके, बद्धभावेत्यादौ 'उन्नतावस्थितेऽस्मि'न्निति क्वचित् पाठः । उन्नतः सन् अवस्थितः सर्व्वोन्नत्ये वर्त्तमानः सर्व्वाग्रगण्य इत्यर्थः, तादृशे अस्मिन् तव पितरीत्यन्वयः

† स्मारयति स्मृतिगोचरीकरोति । अभियुक्तमित्यत्र अभिषिक्तमिति पाठान्तरम् । महासेनं कार्त्तिकेयम् ।

राजा। अनुगृहीतोऽस्मि मघवता।

नारदः। भो राजन्! किं ते भूयः प्रियं करोतु पाकशासनः?।

राजा। अतःपरमपि प्रियमस्ति यदि, भगवान् पाकशासनः प्रसादं करोतु ततः।

(भरतवाक्यम्)।

परस्पर-विरोधिन्यो रेकसंश्रय-दुर्लभम्।
सङ्गतं श्रीसरस्वत्यो र्भूयादुद्भूतये सताम्॥ †

अपिच।

सर्व्वस्तरतु दुर्गाणि; सर्व्वो भद्राणि पश्यतु।
सर्व्वः कामान-वाप्नोतु; सर्व्वः सर्व्वत्र नन्दतु॥ ‡

(इति निष्क्रान्ताः सर्व्वे)

इति श्रीकालिदासकृते विक्रमोर्व्वशीनामत्रोटके पञ्चमोऽङ्कः।

समाप्तोऽयं ग्रन्थः।

---

* एकसंश्रयदुर्लभम् एकाधारदुष्प्रापम्। सङ्गतं मिलनम्। उद्भूतये उत्कृष्टविभूतये। तद्भूतये इति पाठे तत् अपूर्व्वमित्यर्थः, इदं सङ्गत-पदस्य विशेषणम्।

† दुर्गाणि दुःखानि। भद्राणि मङ्गलानि। काम्यन्ते इति कामाः अभिलषितविषयाः, तान्। 'अन्ते काव्यस्य नित्यत्वात् कुर्य्यादाशिष-मुत्तमाम्, इत्यादि सारस्वतालङ्कारे दर्शनात् काव्यान्ते भगवता कालि-दासेन नायकेच्छानुरूपोऽयमाशीर्व्वादः श्लोकद्वयेन प्रयुक्त इत्यनुसन्धेय-मिति।